# DDCE Utkal University

# संस्कृतम् (एम.ए.)

# M.A. (Sanskrit)

**PAPER - II**

# व्याकरणम्
# (सिद्धान्तकौमुदी)

सम्पादना

**डा. कालीप्रसन्न शतपथी**

साधारण-संपादकः

**प्रफेसर सुस्मित प्रसाद पाणिः**

UTKAL UNIVERSITY

DDCE
Education for All

**दूर एवं निरन्तर शिक्षा निदेशालय**

उत्कल विश्वविद्यालङ्क, बाणीविहार

भुबनेश्वर

# सूचीपत्रम्


| विषयक्रमः | | पृष्ठाङ्कः |
|---|---|---|
| 1. | अनुविभागः प्रथमः (Unit-I)<br>संज्ञाप्रकरणम् - परिभाषाप्रकरणम् | 5-27 |
| 2. | अनुविभागः द्वितीयः (Unit-II)<br>अच् सन्धिप्रकरणम् | 28-36 |
| 3. | अनुविभागः तृतीयः (Unit-III)<br>कारकप्रकरणम्<br>(प्रथमाविभक्तितः चतुर्थीविभक्तिपर्यन्तम्) | 37-49 |
| 4. | अनुविभागः चतुर्थः (Unit-IV)<br>कारकप्रकरणम्<br>(पञ्चमीविभक्तितः सप्तमीविभक्तिपर्यन्तम्) | 50-61 |
| 5. | अनुविभागः पञ्चमः (Unit-V)<br>समासप्रकरणम् | 62-107 |
| 6. | आदर्शप्रश्नाः | 108-111 |

श्रीः

नमो गुरुभ्यो गुरुपादुकाभ्यः

संस्कृतम् - द्वितीयंपत्रम्

Unit - I

# सिद्धान्तकौमुदी

## संज्ञाप्रकरणम्

व्याकरणम् : परम्परानुसारेण वेदानां लौकिक संस्कृत साहित्यस्य च मुखसदृशं व्याकरणं विभाति । व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम् । व्याकरणं नाम शब्दनिर्माणशास्त्रम् । अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दाः अनेन इति अनुशासनम् नाम सूत्रवार्त्तिक भाष्यव्याख्यानादिरूपं शास्त्रम् । व्याकरणस्य नामान्तरं शब्दानुशासनम् ।

सामान्यतया व्याकरणशास्त्रं शृङ्खलित मार्जित भाषा प्रयोग निमित्तं प्रेरयति ।

### सिद्धान्तकौमुदी

संसारे बहवः व्याकरण शास्त्र प्रणेतारः आसन् । तेषु अष्टाध्यायी - सूत्रकारः महर्षिः पाणिनिः वार्त्तिककारः मुनिः कात्यायनः महाभाष्यकारः शेषावतारः पतञ्जलिश्च प्रसिद्धाः नमस्याश्च । महामहोपाध्याय श्री भट्टोजिदीक्षित विरचिता सिद्धान्त कौमुदी सम्प्रति बहुजनादृता भवति । पाणिनि प्रणीत सूत्राणि क्रमेण प्रयोजनदृष्ट्या सज्जीकृत्य महाभाष्यं वार्त्तिकं च अवलम्ब्य संस्कृतभाषया वृत्तिरूपेण व्याख्यानं कृतवान् श्री दीक्षित महोदयः । स्वयं ग्रन्थस्य प्रारम्भे मङ्गलाचरणेन प्रकाशयति ।

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।**
**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ।।**

पाणिनि-कात्यायन-पतञ्जलि नामधेयं वैयाकरणमूर्धन्य भूतं मुनित्रयं नमस्कृत्य तत् तद् व्याकरणशास्त्रोक्तवचनानि सम्यग्विचार्य यथा कौमुदी (चन्द्रिका) जनान् आह्लादयति तथा प्रामाणिक व्याकरणग्रन्थरूपेण सर्वान् सिद्धान्तान् अवश्यं सुखेन बोधयिष्यतीति वैयाकरण सिद्धान्त कौमुदी नामधेया पुस्तिका (भट्टोजिदीक्षितेन) विरचिता इति ।

[सम्यक् ज्ञायन्ते अनया इति (उक्त्या, शिक्षया पद्धत्या च) संज्ञा] यया उक्त्या कस्यचित् वस्तुनः विषये पूर्णधारणा भवति सा संज्ञा इति कथ्यते ।

१ - अइउण्, २ - ऋऌक्, ३ - एओङ्, ४ - ऐऔच्, ५ - हयवरट्, ६ - लण्, ७ - ञमङणनम्, ८ - झभञ्, ९ - घढधष्, १० - जबगडदश्, ११ - खफछठथचटतव्, १२ - कपय्, १३ - शषसर्, १४ - हल्

इति माहेश्वराणिसूत्राण्यजादिसंज्ञार्थानि । एषामन्त्या इतः लण्सूत्रेऽकारश्च । हकारादिष्वकार उच्चारणार्थः ।

परम्परानुसारेण भगवान् महेश्वरः शङ्करः ज्ञानेश्वरः वाणीश्वरः इति प्रसिद्धिरस्ति । महेश्वरात् आगतानि इति माहेश्वराणि । पाणिनीय शिक्षाग्रन्थात् नन्दिकेश्वरकृत कारिकायाः ज्ञायते यत् अइउण्सूत्रतः हल्सूत्रपर्यन्तं चतुर्दश सूत्राणि वस्तुतः प्रामाणिकानि न तु निरर्थकानि ।

**शङ्करः शाङ्करीं प्रादात् दाक्षीपुत्राय धीमते ।**
**वाङ्मयेभ्यः समाहृत्य दैवीं वाचमिति स्थितिः ।**

**येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।**

(दाक्षीपुत्राय) पाणिनये भगवान् शङ्करः अक्षरसमाम्नायं (परमम्परागत ज्ञाननिधिं) प्रतीकरूपेण दत्तवान् । पुनश्च

**नृत्तावसाने नटराजराजो**
**ननाद ढक्कां नव पञ्चवारम् ।**
**उद्धर्तुकामः सनकादिसिद्धान्**
**एतद् विमर्शे शिवसूत्रजालम् ।**

भगवान् शङ्करः नव पञ्चवारं (चतुर्दशिवारम्) स्वडमरुम् अवादयन् । सनकादिसिद्धानाम् उद्धारार्थं समग्रसंसारे ज्ञानप्रचारार्थं चतुर्दशसूत्ररूपेण शिवसूत्रजालं विस्तृतम्। इति प्रसिद्धिः।

एषाम् अन्त्याः इतः । पूर्वोक्त चतुर्दशसूत्राणाम् अन्त्याः वर्णाः इतः भवन्ति । अर्थात् यस्य वर्णस्य इत् संज्ञा भवति, तस्य लोपः भवति । अतः चतुर्दशसु सूत्रेषु स्थिताः अन्त्या वर्णाः पुनश्च षष्ठे लण् सूत्रे स्थितः अकारश्च इत्संज्ञका भवन्ति । हकारादिषु ये अकाराः सन्ति केवलं सुखोच्चारणार्थं तेषां व्यवहारः भवति, अन्यथा ह् य् व् र् ल् ञ्.... इत्यादि व्यञ्जनवर्णानामुच्चारणं वस्तुतः कष्टकरं भवति ।

१. हलन्त्यम् (१/३/३) हल् इति सूत्रेऽन्त्यमित्स्यात् ।

हलि अन्त्यम् इत् भवेत् । अर्थात् चतुर्दशे हल् इति माहेश्वरेसूत्रे अन्त्यलकारस्य इत् संज्ञा भविष्यति । (परवर्तिनिसूत्रे हल् संज्ञानिरूपणं भविष्यति)

२. आदिरन्त्येन सहेता (१/१/७१) अन्त्येन इता सह आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् इति हल् संज्ञायाम् । आदिवर्ण: अन्त्येन इत्संज्ञकवर्णेन सह मध्यगानां मध्यस्थितवर्णानां स्वस्य च संज्ञा भवति । हयवरट् सूत्रस्य हकार: इत्संज्ञक हल् सूत्रस्य लकारेण सह संयुक्त: भूत्वा मध्यवर्त्ति वर्णानां स्वस्य हल् इति संज्ञां च वोधयति । वस्तुत: एतत् सूत्रं प्रत्याहारविधायकसूत्रम् । प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा: अस्मिन् इति प्रत्याहार: । अस्मिन् हल् प्रत्याहारे सर्वे व्यञ्जनवर्णा: गृहीता: भवन्ति । ह वर्णत: ल वर्णपर्यन्तम् संक्षेपेण हल् इति उच्यते ।

सिद्धान्तकौमुदी पुस्तके आदिरन्त्येन सहेता इति सूत्रात् परं पुनरपि हलन्त्यम् - १/३/३ सूत्रस्य उल्लेख: अस्ति । तत्र वृत्ति: - उपदेशेऽन्त्यं हल् इत्स्यात् । उपदेश आद्योच्चारणम् । तत: अण्, अच् इत्यादि संज्ञासिद्धौ ।

अत्र तात्पर्यमस्ति यत् - प्रथमत: हलन्त्यम् सूत्रोच्चारणेन हल् इति पदनिर्माणं न सम्भवेत् किन्तु अर्थ: भवति हलि अन्त्यम् पुनश्च अन्त्यं हल् (सूत्राणाम् अन्त्यस्थितं हल् नाम व्यञ्जनवर्ण:) इत् स्यात् । अत्र आदिरन्त्येन सहेता सूत्रं विना हल् पदनिर्माणं न सम्भवेत् । यत: हल् पदस्य अवबोधनार्थम् आदिरन्त्येन सहेता सूत्रस्य आवश्यकता अस्ति । आदिरन्त्येन सहेता सूत्रेण अइउण् ॠलृक - एओङ्, ऐऔच् - सूत्रादीनां संक्षेपेण - अण् इक् अच् - प्रभृति प्रत्याहारनिर्माणं सम्भवति । यत्र अच् प्रत्याहार: अवर्णत: औवर्णयावत् सर्वान् स्वरवर्णान् सूचयति । हल् प्रत्याहार: व्यञ्जनवर्णान् सूचयति ।

'हलन्त्यन्' सूत्रम् आदिरन्त्येन सहेता सूत्रं च परस्परं प्रति निर्भरशीले । अत्र अन्योन्याश्रयदोष: । तद् दोष-निराकरणार्थं भट्टोजिदीक्षितेन पुनश्च हलन्त्यम् सूत्रम् उपस्थाप्य संशय: मोचित: । माहेश्वरसूत्रेषु प्रतिसूत्रम् अन्त्यं हल् अक्षरं नाम व्यञ्जनवर्ण: इत् भवति । हल् इति प्रत्याहारस्य निर्मणानन्तरम् अन्येषाम् अण्, अच्, इत्यादीनां प्रत्याहारणां निर्माणम् आदिरन्त्येन सहेता इति सूत्रस्य साहाय्येन भवति । यत्र अल् इति प्रत्याहार: (अइउण् - - -हल्) सर्वान् वर्णान् वोधयति ।

३. उपदेशेऽजनुनासिक इत् । (१/३/२)
उपदेशेऽनुनासिकोऽजित् संज्ञ: स्यात् ।

प्रतिज्ञानुनासिक्या: पाणिनीया: । लण् सूत्रस्यावर्णेन सहोच्चार्यमाणो रेफो रलयो: संज्ञा । प्रत्याहारेष्वितां न ग्रहणम् । 'अनुनासिक' इत्यादिनिर्देशात् । न ह्यत्र ककारे परेऽच्कार्यं दृश्यते । आदिरन्त्येन सहेता इत्येतत् सूत्रेण कृता: संज्ञा: प्रत्याहारशब्देन व्यवह्रियन्ते ।

उपदेशे आद्योच्चारणसमये अनुनासिक संज्ञकानाम् 'अच्' वर्णानाम् इत्संज्ञा (लोपः) भवेत् । के अच् वर्णाः अनुनासिकरूपेण गृहीताः भविष्यन्ति इति शङ्कायां भट्टोजिदीक्षितः सूचयति - पाणिनिशिष्याः सम्यक् तत् प्रतिज्ञाय बोधयन्ति - यथा लण् सूत्रे अकारश्च । लण्-सूत्रस्थः अकारः अनुनासिकः (अच्) इत् भवति । लण् सूत्रस्य इत्संज्ञकेन अकारेण सह हयवरट् सूत्रस्य र् वर्णस्य संयोगेन र - प्रत्याहारः सिद्धः भवति । रेफः - र-वर्णं बोधयति । र प्रत्याहारः रलयोः संज्ञा । 'रट्ल' - एवं न भवति कारणं हयवरट् सूत्रे अन्त्यं हल् ट् । तस्य इत्। प्रत्याहारेषु इतां (इत् संज्ञकवर्णानां) ग्रहणं न भवति अनुनासिक इति पदप्रयोगेण क-कारस्य स्थितिः वर्ण्यते । अइउण्, ऋलृक् एओङ्, ऐऔच् - इत्यादिषु अच् प्रत्याहारनिर्माणे ण्, क्, ङ् प्रभृतिवर्णानाम् इत्संज्ञकानां ग्रहणं नैव विधीयते । अन्यथा अनुनासिक पदनिर्माणम् असम्भवम् आसीत् । क वर्णः यदि अच् रूपेण गृहीतः भवति तर्हि इको यणचि सूत्रेण अनुनासिकपदे - इ-कार स्थाने च-कारस्य आदेशः भविष्यति तेन अनुनास्यक पदं पुनरपि लोपो 'व्योर्वलि' सूत्रेण च-कारस्य लोपेन 'अनुनास्क' इति पदं सिद्धं भवेत् । किन्तु एतादृशः व्यवहारः नास्ति, अतः आदिरन्तयेन सहेता सूत्रेण प्रत्याहारेषु इत् संज्ञक वर्णानां ग्रहणं न भवति ।

४- **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** १/१/२७ (ऊकालः अच् ह्रस्वदीर्घप्लुतः )। उश्च ऊश्च उ ३ श्च वः । वां कालः इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् स प्रत्येकमुदात्तादिभेदेन त्रिधा । उच्चारणदृष्ट्या अचां (स्वरवर्णानां) ह्रस्वदीर्घप्लुतभेदेन प्राचीनकालाद् अष्टादश भेदाः विशेषतः वैदिक मन्त्रसूक्तप्रयोगेषु भेदाः लक्ष्यन्ते ।

**एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् ।**

मात्राशब्दः कालबोधकः । महर्षिः पाणिनिः अचां मात्राकाला दिबोधनार्थम् ब्राह्ममुहूर्तसमये कुक्कुटस्वरानुसारं कालविधिं सूचयति । कुक्कुटः स्वयं प्रथमतः ह्रस्वं पुनः दीर्घं ततः परं प्लुतम् उच्चारयति उ- ऊ -उ३ इति क्रमेण स्वरज्ञानं भवति ।

बालक - हरि - मनु - इत्यादि स्थले अकार, इकार - उकार दीनाम् एकमात्रात्वात् ह्रस्वः । गौरी- इत्यत्र ईकारस्य प्रयोगः अत्र मात्राद्वयम् (इ , इ) अतः दीर्घवर्णः । प्रायशः सम्बोधने स्वरवर्णस्य तिस्रः मात्राः दृश्यन्ते यथा - **देवदत्त! ३ अत्र आगच्छ** अत्र मात्रात्रयम् । अतः त्त-कार परवर्त्तिनः अकारस्य प्लुतवर्णत्वं सिद्धम् । व्यञ्जनवर्णः तु स्वरेण सह युक्तः सन् अर्धमात्रः इति उच्यते यथा - हल् - अच् - इण् इत्यादिस्थले ल्-च्-ण् व्यञ्जनवर्णानामुच्चारणकालः अर्धमात्रापरिमितः ।

५. **उच्चैरुदात्तः १/२/२९**

तात्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् । आ, ये ।

यस्य अच: (स्वरवर्णस्य) उच्चारणं तालुप्रभृतिस्थानेषु स्पर्शमात्रेण उच्चै: दीर्घभावेन जायते स: उदात्तसंज्ञक:भवति । यथा आ ये मित्रावरुणा इति मन्त्रे आ ये दीर्घरूपेण उच्चै: उदात्तस्वर: इति कथ्यते ।

६. **नीचैरनुदात्त: १/२/३०** स्पष्टम् अर्वाङ् । ताल्वादिषुस्थानेषु अधोभागे निष्पन्न: अच् अनुदात्तसंज्ञ:स्यात् उच्चारणसमये तालु प्रभृतिस्थानेषु निम्नभागे उच्चारित: अच् स्वरवर्ण: स्वभावत: नीचै: अनुच्चस्वरेण प्रकाशित: भवति । न उदात्त: अनुदात्त:, अर्वाङ् यज्ञस्संक्राम इति मन्त्रे अ - अनुदात: । वैदिकमन्त्रेषु अनुदात्तस्य चिह्नरूपेण वर्णस्य अध: '–' एवं विधारेखा अङ्किता भवति ।

७. **समाहार: स्वरित: १/२/३१**

उदात्तत्वात् अनुदात्तत्वे वर्ण धर्मौं समाह्रियेते यस्मिन् स: अच् स्वरितसंज्ञ:स्यात् । यस्मिन् स्वरवर्णे उदात्तस्य तथा अनुदात्तस्य मिश्रणेन उच्चारणं भवति तस्मिन् स्वरित संज्ञा विधीयते । वैदिकमन्त्रे स्वरितस्य उपरि' । एवं भावेन ऊर्ध्वरेखासूचितास्ति । '<u>अ</u>ग्नि मी'ले .... इत्यादि मन्त्रे '<u>अ</u>' - अनुदात्त: 'ग्नि' - उदात्त:, मी' - उदात्त - अनुदात्तयो: मिश्रणेन स्वरित: । वैदिकमन्त्रेषु एतेषां व्यवहार: दृश्यते ।

८. **तस्यादित: उदात्तं ह्रस्वम्** १/२/३२ - ह्रस्वग्रहणमतन्त्रम् । स्वरितस्यादितोऽर्धमुदात्तं बोध्यम् । उत्तरार्धंतु परिशेषादनुदात्तम् । तस्य चोदात्तस्वरितपरश्रवणं स्पष्टम् । अन्यत्र तुदात्तश्रुतित्वे प्रातिशाख्ये प्रसिद्धा । क्व वोऽश्वा: । स्थानां न येऽरा: । शतचक्रं यो३ह्य: । इत्यादिष्वनुदात्त: । अग्निमीले इत्यादौ उदात्तश्रुति: । स नवविधोऽपि प्रत्येकमनुनासिकाऽननुनासिकत्वाभ्यां द्विधा ।।

स्वरितस्य आदिभागस्य अर्धं ह्रस्वम् उदात्तम् । सूत्रे ह्रस्वग्रहणम् अन्यत्र दीर्घप्लुत भेदेन उदात्तादीनां पार्थक्यं सूचयति । स्वरितस्य प्रथमार्धम् उदात्तम् उत्तरार्धम् अनुदात्तम् । अनुदात्तात् परं यदि उदात्तं स्वरितं वा तिष्ठति तर्हि अनुदात्तस्य श्रवणं स्पष्टं भविष्यति, यथा - <u>क्व</u>' <u>(१) वोऽश्वा</u>: अत्र क्व स्थितस्य अकारस्य प्रथमार्धम् उदात्तम् अन्तिमार्धम् अनुदात्तम् अत: एतादृशस्य स्वरितस्य परवर्त्ति-वो इत्यत्र ओकार: उदात्त: । तत: क्व स्थितस्य अकारस्य अन्तिमार्धस्य अनुदात्तस्य श्रवणंस्पष्टम् । <u>ह्रस्वस्वरितस्य</u> एतद् उदाहरणम् ।

रथा' <u>नां</u> न ये' २ ऽ रा: । अत्र 'ये' इति स्थाने -**एकारस्य दीर्घ स्वरितम्** । अत्र रा: इति स्थाने आकारस्य उदात्तम् अत: पूर्वानुदात्तभागस्य श्रवणं स्पष्टम् ।

**<u>श</u>तच'क्रं यो'३ह्य:** । 'यो' स्थित: ओकार: प्लुतस्वरित: । अस्य आदिभाग: उदात्त: अन्त्य: भाग: अनुदात्त: । 'यो' इत्यस्य ओकारपरवर्तिन: ह्यकारस्य 'अकार:' स्वरित: । तत: अनुदात्तात् परस्मिन् यदि स्वरित: स्यात् तर्हि अनुदात्तस्य श्रवणं स्पष्टं भवति । अत्र **प्लुतस्वरितस्य** उदाहरणं परिलक्षितम् ।

अन्यत्र स्वरितात् परम् उदात्तस्य स्वरितस्य वा व्यवहार: न दृश्यते परन्तु प्रचयनाम्ना तत्र उदात्ततर: कश्चित् वैदिक: ध्वनि: लक्ष्यते । तत् तु अनुदात्तस्य श्रवणं विना उदात्तश्रुति: भवति । '<u>अ</u>ग्निमी'ले'' इत्यत्र ले-स्थाने **प्रचय**: अर्थात् उदात्तश्रुते: उदाहरणम् ।

उदात्त-अनुदात्त-स्वरित भेदेन विभक्ताः स्वरवर्णाः ह्रस्वदीर्घप्लुत संज्ञकाः नवविधाः पुनश्च अनुनासिकाऽननुनासिक भेदेन द्विविधाः भवन्ति (परवर्त्तिनिसूत्रे तद्विषये सूचना प्रदास्यते)

९. **मुखनासिकावचनोऽनुनासिकः १/१/८** मुखसहित - नासिकया - उच्चार्यमाणो वर्णोऽनुनासिक संज्ञः स्यात् । तदित्थम् - अइउऋ - एषां वर्णानां प्रत्येकम् अष्टादश भेदाः । लृ वर्णस्य द्वादश । तस्य दीर्घाऽभावात् । एचामपि द्वादश । तेषां ह्रस्वाभावात् ।

एतत् सूत्रम् अनुनासिकः इति संज्ञाविधायकं सूत्रम् । मुखेन सह नासिकया च उच्चार्यमाणः वर्णः अनुनासिकसंज्ञकः। अनुनासिक - अननुनासिक - भेदेन अ इ उ ऋ वर्णाः अष्टादश भेदेन विभक्ताः । प्रथमतः एते वर्णाः ह्रस्वदीर्घप्लुतभेदेन प्रत्येकं त्रिधा विभक्ताः पुनः उदात्त - अनुदात्त स्वरित रूपेण त्रिधा विभक्ता एवं क्रमेण नवविधाः । ततः परम् अनुनासिक अनुनासिकभेदेन द्विविधाः । पूर्णतया अष्टादश विधाः यथा - अ इ उ ऋ - प्रत्येकं वर्णाः

**ह्रस्वरूपेण षड्विधाः**

१- ह्रस्व - उदात्त - अनुनासिकः
२ - ह्रस्व - उदात्त - अननुनासिकः
३ - ह्रस्व - अनुदात्त - अनुनासिकः
४ - ह्रस्व - अनुदात्त - अननुनासिकः
५ - ह्रस्व - स्वरित - अनुनासिकः
६ - ह्रस्व - स्वरित - अननुनासिकः

**दीर्घरूपेण षड् विधाः**

१- दीर्घ - उदात्त - अनुनासिकः
२ - दीर्घ - उदात्त - अननुनासिकः
३ - दीर्घ - अनुदात्त - अनुनासिकः
४ - दीर्घ - अनुदात्त - अननुनासिकः
५ - दीर्घ - स्वरित - अनुनासिकः
६ - दीर्घ - स्वरित - अननुनासिकः

**प्लुतरूपेण षड् विधाः**

१- प्लुत - उदात्त - अनुनासिकः

२ - प्लुत - उदात्त - अननुनासिक:
३ - प्लुत - अनुदात्त - अनुनासिक:
४ - प्लुत - अनुदात्त - अननुनासिक:
५ - प्लुत - स्वरित - अनुनासिक:
६ - प्लुत - स्वरित - अननुनासिक:

लृवर्णस्य दीर्घोच्चारणं नास्ति । किन्तु प्लुतोच्चारणमस्ति अत: लृवर्णस्य द्वादशभेदा: । तथैव ए, ओ, ऐ, औ - वर्णानां ह्रस्वोच्चारणाऽभावात् दीर्घप्लुतरूपेण द्वादशविधा: सन्त: उच्चार्यन्ते ।

अकारस्य - अष्टादश भेदानाम् उदाहरणम् -

अ, अ॒, अ॑, अँ, अँ॒, अँ॑, आ आ॒, आ॑, आँ आँ॒, आँ॑, अ३, अ॒३, अ॑३, अँ३, अँ॒३, अँ॑३ - वैदिकमन्त्रेषु एतादृश: प्रयोग: दृश्यते । प्रायश: लौकिकसंस्कृते साधारणतया एतादृश: व्यवहार: विरल: ।

१०. तुल्यास्यप्रयत्नं सवर्णम् - १.१.९

ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च इति एतद् द्वयं यस्य येन तुल्यं तत्मिथ: सवर्णसंज्ञं स्यात् । अकुहविसर्जनीयानां कण्ठ: । इचुयशानां तालु । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ता: । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतो: कण्ठतालु । ओदौतो: कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकानुस्वारस्य । इतिस्थानानि । यत्नो द्विधा । आभ्यन्तरो वाह्यश्च । आद्यश्चतुर्धा । स्पृष्टेषत्स्पृष्ट - विवृत संवृत-भेदात् । तत्र 'स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्त:स्थानाम् । विवृतमूष्मणां स्वराणां च । ह्रस्वस्याऽवर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायांतु विवृतमेव । एतच्च सूत्रकारेण, ज्ञापितम् तथा हि एतत् सूत्रं सवर्णविधायकसूत्रम् । एतत् सूत्रानुसारं यस्यवर्ण द्वयस्य आस्यं (मुखम्) अर्थात् ताल्वादि - उच्चारणस्थानं प्रयत्नो नाम उच्चारणार्थं प्रकृष्ट: यत्न: अर्थात् चेष्टासमानं भवति । तद् वर्णद्वयं परस्परं सवर्णम् । वर्णानाम् उच्चारणस्थानविषये 'अकुहविसर्जनीयानां कण्ठ: - इति कारिकायां वर्णितम् ।

१. अ - कु (क वर्ग) ह विसर्जनीय (विसर्ग) प्रभृतीनाम् उच्चारणस्थानं कण्ठ:
२. इ - चु (च वर्ग) य श प्रभृतीनाम् उच्चारणस्थानं तालु
३. ऋ - टु (ट वर्ग) र ष प्रभृतीनाम् उच्चारणस्थानं मूर्धा
४. लृ - तु (त वर्ग ) ल स प्रभृतीनाम् उच्चारणस्थानं दन्ता:
५. पु (प वर्ग) उपध्मानीय (अर्धविसर्गपूर्व ᳵ प ᳵ फ) प्रभृतीनाम् उच्चारण स्थानम् ओष्ठौ ।
६. ञमङणन प्रभृतिवर्णानां तत् तत् वर्गस्य उच्चारण स्थानेन सह नासिका च उच्चारणस्थानरूपेण गृहीता ।
७. एकारस्य ऐकारस्य च उच्चारणस्थानं कण्ठतालु
८. ओकारस्य औकारस्य च उच्चारणस्थानं कण्ठौष्ठम्

९. व कारस्य उच्चारणस्थानं दन्तौष्ठम्

१०. अर्धविसर्गपूर्व (ᳵक) क कार: जिह्वामूलीय: इति उच्यते यत: तस्य उच्चारण स्थानं जिह्वामूलम्

११. अनुस्वारस्य (स्वारम् स्वरवर्णम् अनुसरति इति अनुस्वार:) उच्चारण स्थानं नासिका ।

यत्नो द्विधा - इति प्रयत्नविषये आलोच्यते । प्रकृष्ट: यत्न: उत्तमा चेष्टा । उच्चारणस्य सामर्थ्यं शक्ति: वा प्रयत्नस्य अर्थ: । आभ्यन्तर: प्रयत्न: बाह्य: प्रयत्न: इति प्रयत्न: द्विविध: । आभ्यन्तर: प्रयत्न: (आद्य:) चतुर्धा विभक्त: । बाह्य: (प्रान्त:) प्रयत्न: एकादशधा विभक्त: इति पश्चात् आलोचनीयम् कारणमत्र सवर्णविचारे बाह्य प्रयत्न: अनावश्यक: ।

उच्चारण समये मुखस्य अभ्यन्तरे यत् यत्नादिकं भवति तत् आभ्यन्तरम् । मुखात् बहि: यत् भवति तदेव बाह्यम् ।

आभ्यन्तरप्रयत्नरूपेण अधोवर्णिता स्वीकृता:

१. - स्पृष्ट: - क वर्णत: म वर्ण पर्यन्तं स्पर्शवर्णानां प्रयत्न:

२ - ईषत् स्पृष्ट: - य र ल व इति अन्त:स्थवर्णानां प्रयत्न:

**(स्वरव्यञ्जनयो: अथवा स्पर्शस्य ऊष्मणां च मध्ये तिष्ठन्तीति - अन्त:स्था:)**

३. विवृत: - शषसह - इति ऊष्म वर्णानाम् अकारादीनां स्वरवर्णानां प्रयत्न: । एतेषाम् उच्चारण समये जिह्वाग्रादिस्थानात् दूरावस्थानं भवति

४. संवृत: - ह्रस्व - अकारस्य जिह्वाग्र - कण्ठादिसमीपावस्थानरूपक: प्रयत्न: ।

ह्रस्व अकारस्य प्रयोगसमये आभ्यन्तर: प्रयत्न: संवृत: (समीपावस्थित:) भवति, किन्तु दीर्घप्लुत - अकारस्य प्रक्रियायां नाम व्याकरणसूत्रसाधने शास्त्रीय प्रवृत्ति समये आभ्यन्तर: प्रयत्न: दूरावस्थित: सन् विवृत: भवति । सूत्रकार: महर्षि: पाणिनि: अष्टाध्यायी ग्रन्थस्य (अ, अ) अन्तिमेसूत्रे एतदेव सूचयति ।

११. अ अ ८/४/६८ विवृतमनूद्य संवृत: अनेन विधीयते । अस्य च अष्टाध्यायीं सम्पूर्णां प्रति असिद्धत्वात् शास्त्रदृष्ट्या विवृतत्वम् अस्ति एव । तथा च सूत्रम् ।

'अ अ' - एतत् सूत्रम् अष्टाध्यायी ग्रन्थस्य अन्तिमसूत्रम् । पुनश्च सम्पूर्ण - अष्टाध्यायीं प्रति असिद्धमिति परसूत्रे वर्णितमस्ति । अस्मिन् सूत्रे स्वभावेन विवृतस्य अकारस्य ह्रस्व रूपेण उच्चार्यमाणस्य अकारस्य संवृतत्वविधानं वर्णितम्, वस्तुत: कार्यक्षेत्रे व्याकरणादिशास्त्रेषु शब्दनिर्माणे सन्धिविधाने एतत् सूत्रं निरर्थकम् अनावश्यकम् । कारणं सर्वदा अकारस्य शास्त्रदृष्ट्या विवृतरूपेण उच्चारणं भवति । एतत् सूत्रंसूचयति यत् प्रथम: अकार: विवृत:, द्वितीय: अकार: संवृत: । धातुनामप्रत्ययादिषु य: अकार: विवृत रूपेण पठ्यते वस्तुत: स एव अकार: संवृत: । दण्ड + आनयनम् अत्र दण्ड शब्द स्थित: ह्रस्व: अकार: विवृतरूपेण गृहीत:, आनयनम् शब्दस्य आदि: आकार: (दीर्घ:) । उभयो: उच्चारणस्थान प्रयत्न (विवृत) साम्यत्वात् सवर्णसंज्ञा

विधीयते । **अकःसवर्णेदीर्घः** इति सूत्रेण 'दण्डानयनम्' सिद्धं भवति । अन्यथा अ अ सूत्रेण प्रयत्न भेदात् सिद्धं न स्यात् ।

१२. **पूर्वत्रासिद्धम्** ८/२/१

अधिकारोऽयम् । तेन सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा त्रिपाद्याम् अपि पूर्वं प्रति परंशास्त्रमसिद्धंस्यात् ।

पूर्वत्रासिद्धम् - एकम् अधिकारसूत्रम्, न च विधायकसूत्रम् । अनेन सूत्रेण सपादसप्ताध्यायीं प्रति अवशिष्टात्रिपादी असिद्धा । अष्टाध्यायी ग्रन्थस्य पूर्वैः सप्तभिः अध्यायैः सह अष्टमाध्यायस्य प्रथमपादपर्यन्तं सपादसप्ताध्यायी इति अर्थः । पाणिनेःसूत्राणि अष्टसु अध्यायेषु लिखितानि । प्रत्यध्यायं चत्वारः पादाः (विभागाः) सन्ति । प्रतिपादं सूत्राणि सन्ति । पादेन सह वर्त्तमाना सपादा । सपादा चासौ सप्ताध्यायी (सप्तानाम् अध्यायानां समाहारः) सपादसप्ताध्यायी । पूर्वत्रासिद्धम् - अष्टमाध्यायस्थ द्वितीयपादस्य प्रथमं सूत्रम् । पूर्वत्र - इति पदेन सपादसप्ताध्यायीस्थितानि सर्वाणि सूत्राणि सूच्यन्ते । ततः पराणि सूत्राणि त्रिपादी पदेन लक्षितातिं । त्रयाणां पादानां समाहारः इति त्रिपादी । सूत्रस्य गूढार्थः पूर्वशास्त्रं सूत्रं प्रति परशास्त्रं सूत्रम् असिद्धम् यथा मम + आसनम् (ममासनम्) अत्र मम शब्दस्य अन्त्यः अकारः आसनम् शब्दस्य आद्यः आकारः परस्परं मिलित्वा **अकः सवर्णे दीर्घः** ६.१.१०१ सूत्रेण सवर्णत्वातः एकादेशः लभेते पुनश्च अ अ ८.४.६८ सूत्रेण यदि मम शब्दस्य अन्त्यः अकारः ह्रस्वत्वात् संवृतः स्यात्, प्रयत्नभेदात् सवर्णपार्थक्यात् सन्धिः न भवेत् । दीर्घ एकादेशः न भवेत् । अतः अत्र **अकः सवर्णे** दीर्घः ६.१.१०१ सपादसप्ताध्यायी पूर्वं सूत्रं प्रति अ अ ८.४.६८ त्रिपादीपरं सूत्रम् असिद्धम् । एवंक्रमेण त्रिपाद्यामपि पूर्वं प्रति परंशास्त्रमसिद्धं पूर्वसूत्रेण शब्द निर्माणसमये परसूत्रेण विरोधे आगते सति परसूत्रं नास्ति इति चिन्तनीयम् ।

<u>बाह्य प्रयत्नस्त्वेकादशधा</u> । विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तो ऽनुदात्तः स्वरितश्चेति ।

**खयां यमाः खयः ᳲ क ᳲ पौ विसर्गः शर एव च ।**
**एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ।**
**कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः ।**
**अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः ।**

वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशोवर्णः प्रातिशाख्ये प्रसिद्धः । पलिक्क्नीः, चखख्नतुः अग्ग्निः घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशाः एव यमाः । तत्र वर्गाणां प्रथमद्वितीयाः खय, तथा तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येषां विवारः, श्वासोऽघोषश्च । अन्येषां तु संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमाः प्रथमतृतीययमौ यरलवाश्चाल्पप्राणाः । अन्ये महाप्राणाः इत्यर्थः । बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायाम् अनुपयुक्ताः तथाप्यान्तरतम्यपरीक्षायाम् उपयोक्ष्यन्ते इति बोध्यम् । कादयोमावसानाः स्पर्शाः यरलवा अन्तःस्थाः । शषसहा ऊष्माणः । अचः स्वराः ᳲक ᳲप इति कपाभ्यां प्राक् अर्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ । अं अः इत्यचः परावनुस्वारविसर्गौ । इति स्थानप्रयत्नविवेकः । ऋलृवर्णयोर्मिथः

सावर्ण्यं वाच्यम् (वार्तिकम् १०५) अकारहकारयोरिकारशकारयोर्ऋकार षकारयोश्चमिथः सावर्ण्ये प्राप्ते...

१३ - नाऽऽज्झलौ १.१.१०

आकार सहितोऽच्, आच् स च हल् च इति एतौ मिथः सवर्णौ न स्तः । तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येषु परेषु यणादिकं न । अन्यथा दीर्घादीनामपि ग्रहणकशास्त्रबलात् अच्त्वं स्यात् । तथा हि...

न + आ + अच् + हलौ = नाऽऽज्झलौ । अर्थात् न आच् हलौ । आच्-स्वरवर्णाः हल्-व्यञ्जनवर्णाः परस्परं सवर्णरूपेण गृहीताः न भवन्ति इति अर्थः, यतः दधिं + हरति, दधि + शीतलम् , दधि + सान्द्रम्, दधि+ षष्ठम् इत्यादिषु सन्धिद्वारा किमपि परिवर्त्तनं न भवति । कारणमत्र उच्चारणस्थानप्रयत्नतुल्यात् अकारहकारयोः इकारशकारयोः लृकार सकारयोः ऋकारषकारयोः नाऽऽज्झलौ सूत्रेण सवर्णसंज्ञा न भवति। अकारादयः यदि हकारादिभिः सह सवर्णाः स्युः तर्हि ग्रहणक शास्त्रबलात् हकारादीनाम् अपि अच्त्वं नाम स्वरवर्णत्वं सम्पद्येत । तेन दधि + हरति प्रभृतिस्थानेषु 'इको यणचि' सूत्रेण अच् परकत्वात् (हरति स्थाने अरति न्यायेन दधि शब्दस्य 'इ' कारस्य) यण् आदेशः स्यात् । दधि + शीतलम् स्थाने इकारस्य अच् परकत्वात् (शीतलम् इतिस्थाने ईतलम् न्यायेन) अकःसवर्णे दीर्घः इत्यनेन दीर्घ एकादेशः स्यात् । परन्तु नाऽऽज्झलौ सूत्रेण स्वर व्यञ्जनयोः सावर्ण्यनिषेधेन दधिहरति इत्यादिषु इकारस्य हकारादिपरे अच्त्वपरकत्वाभावात् यण् + आदि + आदेशः न भवति । अन्यथा स्वरव्यञ्जनयोः सावर्ण्य विचारे प्राप्ते अ + अ = आ, इ + इ = ई दीर्घादीनां सदृशं हकारादीनाम् अपि अच्त्वं स्वरवर्णत्वं स्यात् । वस्तुतः तादृशं न भवति।

१४. अणुदित्सवर्णस्य चाप्रत्ययः १.१.६९

प्रतीयते इति प्रत्ययः । अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञास्यात्, अत्राण् परेण णकारेण । कुचु टु तु पु एते उदितः । अ इत्यष्टादशानां संज्ञा । तथेकारोकारौ ऋकारस्त्रिंशतः । एवम् लृकारोऽपि । एचो द्वादशानाम् एदैतोरोदौतोश्च न मिथः सावर्ण्यम् । 'ऐ औ च्' इति सूत्रारम्भसामर्थ्यात् । तेनैचश्चतुर्विंशतेः संज्ञाः स्युरिति नापादनीयम् । 'नाऽऽज्झलौ (सू १३) इति सावर्ण्यनिषेधो यद्यप्याक्षरसमाम्नायिकानामेव, तथापि हकारस्याऽऽकारो न सवर्णः । तत्राप्याकारस्य प्रश्लिष्टत्वात् ।तेन विश्वपाभिः इत्यत्र होढः (सू ३२४) इति ढत्वं न भवति । अनुनासिकाननुनासिकभेदेन यवला द्विधा । तेन अनुनासिकास्ते द्वयोर्द्वयोः संज्ञा ।

अण् + उदित् + सवर्णस्य च + अप्रत्ययः । एतत् सूत्रं सवर्णग्रहणकसूत्रम् । अनेन सूत्रेण अप्रत्ययः अण् सवर्णसंज्ञकः । पुनश्च उदित् च सवर्णसंज्ञकः अप्रत्ययः अर्थात् प्रत्यय रूपेण यस्य व्यवहारः न भवति। अण् प्रत्याहारविशेषः । अकारात् आरभ्य माहेश्वर सूत्रस्य लण् पर्यन्तम् सर्वे वर्णाः । अन्यत्र कुम्भकार शब्द निर्माणे कुम्भ + कृ + अण् (कर्मणि + अण्) इति प्रत्ययः । कु चु, टु तु पु एते उदितः । उपदेशे अच् अनुनासिक इत् । एतेषाम् 'उ" कारस्य इत् भवति । कु - इति कथने क ख ग घ ङ इति पञ्च क - वर्ग वर्णानां ग्रहणम् । चु - इति कथने चवर्ग वर्णानां टु - इति कथने ट वर्ग वर्णानां तु इति कथने

त वर्ग वर्णानां पु इति कथने प वर्ग वर्णानां च ग्रहणं भवति । एते उदितः स्ववर्गीयसवर्णसंज्ञकाः । अकारस्य ह्रस्व दीर्घ प्लुत उदात्त अनुदात्त स्वरित अनुनासिक - अननुनासिक भेदेन अष्टादशानां सवर्ण संज्ञा । तथैव इकारस्य, उकारस्य च अष्टादशानां सवर्णसंज्ञा । ऋकार ऌकारयोः सावर्ण्यत्वात् ऌवर्णस्यदीर्घाभावात् च ऋकारस्य त्रिंशतः (ऋकार १८ + ऌकार १२) सवर्णसंज्ञा । एकारस्य ऐकारस्य ओकारस्य औकारस्य च ह्रस्वाभावात् प्रत्येकं द्वादशानां पृथक् पृथक् सवर्णसंज्ञा । एकार - ऐकार योः तथा ओकार - औकारयोः परस्परं सावर्ण्यं नास्ति, अतः एकारस्य १२ + ऐकारस्य १२ इति सम्मिश्र्य चतुर्विंशतिभेदाः नैवस्युः । 'नाऽऽज्झलौ' सूत्रेण सावर्ण्यनिषेधः माहेश्वरसूत्रस्थान् वर्णान् प्रति प्रयुक्ताः तथापि 'ह' कारस्य आकार न सवर्ण। । कारणं सूत्रे आकारः प्रश्लिष्ट भावेन विद्यते । स्पष्टतया आकारस्य उल्लेखः नास्ति ततः विश्वपाभिः इत्यत्र विश्वपा + भिस् स्थाने 'होढः' सूत्रेण आकारस्य ढत्वं न भवति । यदि आकार हकारयोः सावर्ण्य भवेत् तर्हि विश्वपढ्भिः इति विचित्रं रूपंस्यात् । वस्तुतः तत् न सम्भवति । य व ल वर्णाः अनुनासिक - अननुनासिक भेदेन द्विधा विभक्ताः । यँ वँ लँ एते अनुनासिकाः य व ल - एते अननुनासिकाः । परस्परं सवर्णाः ।

अण् प्रत्याहारमध्ये यद्यपि हकारस्य रकारस्य च उपस्थितिरस्ति तथापि तयोः अन्य भेदाभावात् अनुदित् सवर्णस्य चाप्रत्ययः सूत्रेण अण्रूपेण व्यवहारः नास्ति ।

**१५. तपरस्तत्कालस्य १.१.७०**

तः परो यस्मात् सः तात् परश्चोच्चार्यमाणसमकालस्य संज्ञा स्यात् । तेन 'अत्' 'इत्' इत्यादयः षण्णां षण्णां संज्ञा । ऋत् इति द्वादशानाम् । तपरः + तत् कालस्य । तपरः इति कथनेन अर्थद्वयम् आगच्छति । १. तः परः यस्मात् सःतपरः । (बहुव्रीहिः) २ - तात् परः तपरः (पञ्चमीतत्पुरुषः) । बहुब्रीहिसमासान्तपदेन तपरवर्णः 'त'स्य पूर्ववर्णं, पञ्चमीतत्पुरुषान्तपदेन 'त'स्य परवर्णं च बोधयति । तस्य काल इव कालः यस्य सः तत्कालः । अर्थात् अनेन सूत्रेण ज्ञायते यत् 'त' वर्णात् पूर्वं त वर्णात् परं च उच्चार्यमाणाः अण् प्रत्याहारान्तर्गता स्वसममात्रानुसारम् उच्चार्यमाणानां वर्णानां संज्ञा । ततः अत् इत् उत् प्रभृतयः केवलं ह्रस्व रूपेण षड्षड् भेदविशिष्टाः । उच्चारणस्य कालानुसारं स्पष्टतया ह्रस्वत्वम् अनुभूयते । ऋकारऌकारयोः सावर्ण्यत्वात् ऋत् (ऋ + ऌ) द्वादशभेदानां संज्ञा । परन्तु एत् ऐत् ओत् औत् प्रभृतयः दीर्घरूपेण षड्षड्भेदविशिष्टाः ।

अदेङ्गुणः - अत् + एङ् गुणः अस्मिन् सूत्रे अकारात् परं 'त्' पुनः एकारात् पूर्वं 'त्' अस्ति । अतः अकारः एकारः ओकारः च तपरवर्णाः । अकारः ह्रस्वबोधकः एकारः आकारश्च दीर्घबोधकौ । बालकः + भिस् इति स्थिते तपरस्तत्कालस्य सूत्रेण ह्रस्वबोधक बालकशब्दस्य अकारान्तात् 'अतो भिस् ऐस्' सूत्रेण भिस् स्थाने ऐस् स्यात् ततः बालकैः इति पदं साधु । किन्तु लता + भिस् इति स्थिते अकारस्य दीर्घभेदात् आकारान्तात् ऐस् न भवति अतः'लताभिः' भवति ।

**१६ - वृद्धिरादैच् १.१.१**

आदैच्च वृद्धिसंज्ञः स्यात् । वृद्धिः + आत् + ऐच् - एतत् सूत्रम् अष्टाध्यायी ग्रन्थस्य प्रथमं सूत्रम् । आ, ऐ, औ इति त्रयो वर्णाः वृद्धिसंज्ञाः स्युः

यथा - आ - पद् + घञ् = पाठः (कृ + ण्यत् = कार्यम्)

ऐ - एक + एकम् = एकैकम् शिवः + अण् = शैवः

औ - जल + ओघः - जलौघः, श्रुति + अण् = श्रौतम्

**१७ - अदेङ्गुणः** १.१.२ अदेङ्च गुणसंज्ञःस्यात् । अत् + एङ् गुणः - अ, ए, ओ इति त्रयः वर्णाः गुणसंज्ञाः स्युः ।

अ - कृ + तुमुन् = कर्त्तुम्, ऋकारस्य गुणः - अकारः

ए - जि + यत् = जेयम् , इकारस्य गुणः एकारः

ओ - भुज् + ल्युट् = भोजनम् - उकारस्य गुणः ओकारः

**१८. भूवादयो धातवः १.३.१** क्रियावाचिनो भ्वादयो धातुसंज्ञाःस्युः।

भू+ वा + आदयः धातवः । एतत् सूत्रं धातुसंज्ञां बोधयति। भूशब्दस्य एकः अर्थः पृथिवी । वा शब्दस्य अर्थःविकल्पबोधकः । परन्तु धातुगणेषु भ्वादिगणः विद्यते । भवति .. .इति रूपाणि भ्वादयः धातवः क्रियावाचकाः । तथैव वा नामकः धातुः विद्यते । वाति ... इति वायुः तदर्थ भूवादयः क्रियावाचकाः भवन्ति । भूप्रभृतयः वासदृशाः च ये ते धातुसंज्ञकाः इत्यर्थः

**१९. प्राग्रीश्वरान्निपाताः** । १.४.५६ इत्यधिकृत्य

प्राक् + रीश्वरात् + निपाताः - एतत् एकम् अधिकारसूत्रम् । एतस्मात् सूत्रात् आरभ्य अधिरीश्वरे १.४.९७ सूत्रं यावत् निपातसंज्ञाविधानं भविष्यति । निपाताः च अनेकार्थकाः ।

'ईश्वरे तोसुन् कोसुनौ ।' ३.४.१३. सूत्रं यावत् निपातसंज्ञा न भवतु एतदर्थं रीश्वरात् शब्दस्य प्रयोगः कृतः वस्तुतः रीश्वरशब्दः निरर्थकः । निपातो नाम स्वाभाविकः निर्धारितः अपरिवर्त्तनीयः प्रयोगः इति ।

**२०. चादयोऽसत्त्वे १.४.५** अद्रव्यार्थश्चादयो निपातसंज्ञाः स्युः । (च+ आदयः+ असत्त्वे) चः आदिः येषां ते चादयः । न सत्त्वम् असत्त्वम् । सत्त्वं नाम द्रव्यम् । असत्त्वं नाम अद्रव्यम् । लिङ्गसंख्याकारकान्वितं

द्रव्यम् । किन्तु समुच्चयार्थे प्रयुक्तानां चादिगणीयशब्दानां लिङ्गसंख्याकारकाणि सन्ति अतः तेषां निपातसंज्ञा भवति यद्यपि चादयः इति चादिगणेषु च - वा ह अह एव पशु - धिक् प्रभृतयः शब्दाः बहवः सन्ति, तत्र पशुशब्दः 'सम्यक्' अर्थबोधकः अद्रव्यार्थवाचकः । अन्यत्र पशुशब्दः गो-व्याघ्र छाग प्रभृति जीववाचकः सन् निपातसंज्ञां न प्राप्नोति । यत्र पशुशब्दः सम्यक् उत्तमम् अर्थं बोधयति । तत्र निपातसंज्ञा भवति ।

**२१. प्रादयः १.४.५८ ।**

अद्रव्यार्थाः प्रादयस्तथा । प्र + आदयः । प्रादयः अर्थात् अद्रव्यबोधकाः प्रादिगणीयशब्दाः निपातसंज्ञकाः । प्र, परा अप सम् ... प्रभृतयः द्वाविंशति संख्याकाः प्रादिगणीयाः । प्रादिगणेषु वि शब्दः निपातसंज्ञकः अन्यत्र वि शब्दः द्रव्य बोधकः सन् पक्षि सत्त्ववाचकत्वात् निपातसंज्ञां न प्राप्नोति ।

**२२. उपसर्गाः क्रियायोगे १.४.५९**

प्र - प्रभृतयः निपातसंज्ञकाः यदा क्रियायोगे व्यवहृताः भवन्ति तदा उपसर्गसंज्ञां लभन्ते । उप समीपे सृज्यन्ते इति उपसर्गाः । वि + नम् + क्तिन् = विनतिः अत्र वि - उपसर्गः ।

**२३. गतिश्च १.४.६०**

प्रादयः क्रियायोगे उपसर्गसंज्ञाः गतिसंज्ञाश्च स्युः । प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर, वि, आङ्, नि, अधि, अपि अति, सु, उत्, अभि, प्रति, परि उप - एते प्रादयः

प्रादयः क्रियायोगे उपसर्गसंज्ञकाः गति संज्ञकाः च भवन्ति इत्यर्थः । यथा - आगच्छति । आ + गच्छति अत्र 'आ' क्रियायोगे उपसर्गसंज्ञकः, गतिसंज्ञकः च । सर्वे उपसर्गाः गतिसंज्ञकाः भवन्ति, परन्तु प्रादि भिन्नाः अनेके पृथक् शब्दाः अपि गतिसंज्ञकाः भवन्ति । गतिसंज्ञकानां स्वरपरिवर्तनं भवति । अर्थात् उदात्तयुक्त क्रियापद पूर्व स्थित गतेः अनुदात्तः भवति । लौकिक संस्कृतसाहित्ये अस्य स्वरपरिवर्तनस्य व्यवहारः स्पष्टतया न जायते । प्रादिभिन्नाः केचन गतिसंज्ञकाः यथा - अलम् (अलंकृत्य) तिरस् (तिरोभूय) उररी (उररीकृत्य स्वीकृत्य)

२४. नवेति विभाषा १.१.४४ निषेधविकल्पयोर्विभाषा संज्ञा स्यात् ।

निषेध निमित्तं न इति शब्दस्य विकल्पविधान निमित्तं वा इति शब्दस्य व्यवहारः व्याकरण शास्त्रे दृश्यते । एतदर्थं विभाषापदस्य प्रयोगः भवति ।

विभाषा त्रिविधा १) प्राप्तविभाषा २ ) अप्राप्तविभाषा ३ ) उभयत्र (प्राप्ताप्राप्त) विभाषा

१ - प्राप्तविभाषा - यत्र नित्ये कार्ये प्राप्ते पुनः विकल्पेन विधीयते सा प्राप्तविभाषा । दिवस्तदर्थस्य २.३.५८ सूत्रेण दिव् धातोः कर्मणि नित्यं षष्ठी भवति शतस्य दीव्यति । किन्तु विभाषोपसर्गे २.३.५९ सूत्रेण उपसर्गयुक्तस्य दिव्धातो : कर्मणि द्वितीया विकल्पेन षष्ठी च भवति । शतस्य शतं वा प्रतिदीव्यति ।

२ - **अप्राप्तविभाषा** - यत्र केनापि अप्राप्ते कार्ये विकल्पेन विधीयते तत्र अप्राप्तविभाषा । यथा जराया जरसन्यतरस्याम् (७.२.१०१) जराशब्दस्य जरस् कुत्र न अभवत् किन्तु अन्यतरस्याम् नाम विकल्पेन जराशब्दस्य तृतीया एकवचने - जरया विकल्पेन जरसा भवति ।

३. उभयत्र (प्राप्ताप्राप्त) विभाषा : यत्र अन्येन प्राप्ते कार्ये अप्राप्ते च उभयत्र विकल्पेन विधीयते तत्र प्राप्ताप्राप्तविभाषा इत्युच्यते । यथा हृक्रोरन्यतरस्याम् १.४.५३ सूत्रेण अभि + अव उपसर्ग युक्त हृ धातुः भक्षणार्थकः । ततः गतिबुद्धि प्रत्यवसानार्थ (भोजनार्थ) १.४.५२ सूत्रेण अणिजन्तेकर्तरि णिजन्ते कर्मसंज्ञा प्राप्यते, किन्तु अभि + अव उपसर्गौ विना हृ धातुः भोजनार्थकः न भवति अतः अणिजन्तेकर्त्तरि णिजन्ते कर्त्तृत्वं न प्राप्यते । अस्याम् अवस्थायां हृक्रोरन्यतरस्याम् सूत्रेण विकल्पेन कर्मत्वं प्राप्यते । यथा हारयति भृत्यं भृत्येन वा कटम् ।

**२५. स्वं रूपं शब्दस्याशब्दसंज्ञा १.१.६८**

शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना शब्दशास्त्रे (व्याकरणशास्त्रे) गुणवृद्धि निष्ठा प्रभृतयः याः संज्ञाः व्यवहृताः भवन्ति, ताः संज्ञाः विहाय अन्यत्र शब्दस्य स्वंरूपम् एव संज्ञि भवति । अर्थात् शास्त्रे शब्दस्य निजं रूपं हि ग्राह्यम्, शास्त्रे या संज्ञा वर्णिता तस्याः संज्ञायाः रूपं न ग्राह्यम् यथा 'अग्नेर्ढक्' ४.२.३३ सूत्रेण अग्नि + ढक् (एय) आग्नेयः भवति, अग्निपर्यायवाचकशब्द - वह्नि ज्वलनादिभ्यः ढक् प्रत्ययः न युज्यते । केवलम् अग्नि शब्दस्य (अ - ग्- न् - इ) स्वरूपात् एव परिवर्त्तनं भवति । पुनश्च संज्ञापदनिमित्तम् अपि एषः नियमः न युज्यते । यथा - अदेङ्गुणः अत्र 'गुण' संज्ञा । गुणसंज्ञायाः अत् एङ् - संज्ञि । आ. ए. ओ. गुणरूपेण व्यवहृताः भवन्ति । किन्तु गुण (ग् - उ - ण् - अ) शब्दस्य स्वरूपं न परिवर्त्तते । तथैव 'क्तक्तवतुनिष्ठा' अत्र निष्ठा संज्ञायाः अर्थात् निष्ठा शब्दस्य संज्ञि क्त-क्तवतु प्रत्ययौ । अत्र निष्ठा (न्- इ - ष्- ठ् आ) स्वरूपस्य किमपि परिवर्त्तनं न भवति ।

**२६. येनविधिस्तदन्तस्य १.१.२७**

विशेषणं तदन्तस्य संज्ञा स्यात् स्वस्य च रूपस्य । समासप्रत्ययविधौ प्रतिषेधः । उगिद्वर्णग्रहणवर्जम् । येन विशेषणेन विधानं भवेत्, तत् विशेषणं स्वस्य तदन्तशब्दस्य च संज्ञा स्यात् । यथा - एरच् । अर्थात् एः + अच् । एः (इ शब्दस्य षष्ठी - एकवचने) अच् प्रत्ययः भवति । इ शब्दः धातोः विशेषणम् । एरच् सूत्रेण अच् प्रत्ययविधानं भवति । येन विधिस्तदन्तस्य सूत्रेण इ धातोः स्वस्य रूपस्य तथा च तदन्त (इकारान्त) धातोः संज्ञा भवति । अतः इ + अच् = अयः, जि + अच् = जयः, चि + अच् = चयः इत्यादीनि रूपाणि भवन्ति ।

समासप्रत्ययविधौ प्रतिषेधः समासे, प्रत्ययस्थले च तदन्तविधेः निषेधः भवति । कृष्णं श्रितः कृष्णश्रितः अत्र द्वितीया श्रितातीत... - सूत्रेण समास निष्पन्नःकिन्तु कृष्णं परमश्रितः अत्र श्रितान्त शब्देन समासः न भवेत् । तथैव प्रत्ययस्थले । नड़ादिभ्यः फक् सूत्रेण नड् + फक् (आयन) नाडायनः भवति किन्तु सूत्रनड

इति नडान्तशब्दे फक् प्रत्ययः न विधीयते तत्र 'अत इञ्' सूत्रेण सौत्रनाडि इति पृथक् शब्दः निष्पन्नःभवति ।

उगित् वर्णग्रहणवर्जम् -

उगित् ग्रहणे वर्णग्रहणे च तदन्तविधेः प्रतिषेधः नास्ति । उदाहरणम् - समासे पचन्तम् अतिक्रान्ता अतिपचन्ती। अत्र 'पचतृ' शब्दात् ऋकारस्य 'इत्' भवति, ततः पचत् एकः उगित्शब्दः । उगितश्च सूत्रेण नुम् आगमः ङीप् प्रत्ययः च भवतः । एवं क्रमेण पचन्ती पदं निष्पन्नं भवति । तथैव 'अतिपचन्ती" शब्दस्य अन्ते 'पचतृ' उगित् शब्दे स्थिते सति उगितश्च सूत्रेण अतिपचन्ती इति पदं निष्पन्नं भवति । अत्र समासस्थले अपि तदन्तविधेः ग्रहणं भवति ।

पुनरपि वर्णग्रहणविधौ तदन्तविधेः उदाहरणम् - दक्षस्य अपत्यं पुमान् 'दाक्षिः' अत्र 'अत इञ्' सूत्रेण दक्षशब्दात् 'इञ्' प्रत्ययेन 'दाक्षि' इति पदं निष्पन्नं भवति । वस्तुतः 'अत इञ्' सूत्रस्य अर्थः (अतः) ह्रस्व-अकारात् परम् 'इञ्' प्रत्ययः भवति, किन्तु अत्र प्रत्ययविधौ तदन्तविधेः ग्रहणेन तदन्तभावेन दक्ष-अकारान्त शब्दात् इञ् प्रत्ययेन 'दाक्षि' पदं निष्पन्नं जातम् ।

उपर्युक्तस्थलयोः येनविधिस्तदन्तस्य इति नियमः अनुसृतः ।

**२७. विरामोऽवसानम् - १.४.११०** वर्णानामभावः अवसानसंज्ञः स्यात् ।

वर्णानाम् उच्चारणस्य अभावः एव अवसानसंज्ञकः पुनश्च विरामः अवसानम् इत्युच्यते । अर्थात् शब्दस्य, श्लोकस्य, वाक्यस्य उच्चारणस्य वा विश्रामस्थानम् अवसानम् इति व्याकरणशास्त्रे कथ्यते ।

**२८. परःसन्निकर्षः संहिता १.४.१०९**

वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् । यत्र वर्णानां परः (अतिशयः) सन्निकर्षः नाम सन्निधिः सामीप्यं वा स्यात् तत्र संहिता संज्ञा भवति । अर्थात् सन्धिः भवति । अतिशय सामीप्यस्य अर्थः अर्धमात्रायाः अधिककालव्यवधानस्य अभावः । यथा दधि + आनय = दध्यानय अत्र इकार - आकारयोः मध्ये अतिशयसामीप्यम् अस्ति । एतदर्थम् **'इको यणचि'** सूत्रेण इकारस्थाने यकारस्य आदेशः भवति (दध्+ य् + आनय) ततः संहिता (सन्धि) बलेन दध्यानय रूपं सिध्यति ।

**२९. सुप्तिङन्तं पदम् ।** १.४.१४ सुवन्तं तिङन्तं च पदसंज्ञं स्यात् ।

सुप् तिङ् च सुप्तिङौ । सुप्तिङौ अन्ते यस्य तत् सुप्तिङन्तम् । सुवन्त तिङन्तयोः पदसंज्ञा भवति । सुवन्तं नाम शब्द रूपम् । शब्दरूपेषु सु औ जस् तः आरभ्य ङि ओ सुप् पर्यन्तं विभक्ति चिह्नानि व्यवहृतानि भवन्ति । अर्थात् सुप् अन्ते यस्य तत् सुवन्तम् । राम + सु = रामः **एकं पदम्** । किन्तु 'राम' पदं न भवति ।

तिङन्तं नाम धातुरूपम् । धातुरूपेषु तिप् तस् झि तः महिङ् पर्यन्तं चिह्नानि तिङ् रूपेण स्वीकृतानि अर्थात् तिङ् (धातु विभक्ति चिह्नानि) अन्ते यस्य तत् तिङन्तम् । पठ् + तिप् = **पठति** एकंपदम् केवल **'पठ्'** पदं न भवति । शब्दरूपाणां धातुरूपाणां च पदसंज्ञा भवति । सुवन्तपदानाम् उदाहरणम् - रामः रामौ रामाः इत्यादयः ।

तिङन्तपदानाम् उदाहरणम् - पठति, पठतः पठन्ति इत्यादयः ।

३०. हलोऽनन्तराः संयोगः १.१.७ अज्भिरव्यवहिताः हलः संयोगसंज्ञाः स्युः ।

हलः + अनन्तराः संयोगः । अज्भिः स्वरवर्णैः अव्यवहिताः व्यवधानशून्याः परस्परम् अन्तर रहिताः हल् नाम व्यञ्जनवर्णाः संयोगसंज्ञाः स्युः । यथा - वक्ष्यति - अत्र व क् ष् य् अति (क्ष्य्) 'क् ष् य्' स्वरवर्णव्यवधानशून्यत्वात् संयोगसंज्ञकः । किन्तु पृथग् रूपेण क्, ष्, य्, प्रत्येकं हल् संयोग संज्ञकं न भवति ।

३१. ह्रस्वं लघुः १.४.१०

ह्रस्ववर्णाः लघुसंज्ञकाः भवन्ति । एकमात्रो भवेद् ह्रस्वो... इति एकमात्राविशिष्टाः अ इ उ ऋ ऌ इत्यादयः ह्रस्ववर्णाः लघुसंज्ञकाः भवन्ति । कि, कु, कृ इत्यादयः अपि ह्रस्वत्वात् लघुसंज्ञकाः ।

३२. संयोगे गुरु १.४.११. संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् । संयोगे नाम संयुक्तेवर्णे परे यदि तिष्ठति तर्हि पूर्वं ह्रस्वं गुरुसंज्ञं भवति । यथा - पतञ्जलिः अत्र ञ्ज् (ञ् ज्) संयोग वर्णात् पूर्वस्थितं 'त' गुरुसंज्ञं भवति ।

३३. दीर्घं च १.४.१२ दीर्घं च गुरुसंज्ञं स्यात्

दीर्घवर्णाः नाम द्विमात्रो दीर्घः उच्यते न्यायेन आ ई ऊ ॠ ए ऐ ओ औ प्रभृतयः का, की, कू, कॄ के, कै, को, कौ इत्यादयश्च ।

छन्दःशास्त्रेषु गुरुलघुविचारः प्राधान्येन स्वीक्रियते । संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंयुतं पादान्तस्थं विकल्पेन गुरुसंज्ञकं भवति ।

# परिभाषाप्रकरणम्

(अनियमे नियमकारिणी परिभाषा। अत्यावश्यक स्थले विधिशास्त्रस्य प्रवृत्तेः निवृत्तेश्च नियामक सूत्राणि परिभाषारूपेण गृहीतानि। अर्थात् व्याकरणसूत्रार्थबोधने परिभाषा ज्ञानेन अतीव प्रयोजनम् अस्ति।)

३४. इको गुणवृद्धी १.१.३ गुण वृद्धि शब्दाभ्यां यत्र गुणवृद्धीविधीयेते तत्र 'इकः इति' षष्ठ्यन्तं पदमुपतिष्ठते।

गुणशब्देन वृद्धिशब्देन च कुत्र गुणस्य वृद्धेः वा विधानं भवेत् इति शङ्कायाः निराकरणार्थम् इकः इति षष्ठीविभक्तेः एकवचनान्तं पदम् आगच्छति। यथा - **'मिदेर्गुणः'** - अत्र कस्य गुणः भवेत् इति संशयस्थले **इकः** (इ- उ- ऋ - लृ) पदमेव **इ कारस्य गुणः** भवेत् इति समाधानं करोति।

ततः मिद् + तिप् = इकारस्य एकारः गुणः भवति ततः परं साधनप्रणाली द्वारा मेद्यति इति रूपं सिध्यति (मिद् धातोः लट् लकारे प्रथम पुरुषस्य एकवचने रूपम् - मेद्यति)

पुनश्च **मृजेर्वृद्धिः** - अत्रापि **इकः** स्थाने वृद्धिः भवेत् इति स्पष्टम् - मृज् धातोः इकः (इ उ ऋ लृ) ऋकारस्य वृद्धिः आकारः भवति। लटि प्रथम पुरुषैकवचने मृज् + तिप् = (क्रमशः धातुरूप साधनप्रणाली द्वारा) मार्ष्टि इति रूपं सिध्यति।

अन्यत्र - मिद् + उर = मेदुर, मृज् + ल्युट् = मार्जनम्

३५. अचश्च १.२.२८

ह्रस्वदीर्घप्लुतशब्दैर्यत्राज् विधीयते तत्र 'अचः' इति षष्ठ्यन्तं पदमुपतिष्ठते। (अच् + विधीयते)

यत्र ह्रस्व दीर्घप्लुतशब्दैः अच् विधानं भवति तत्र कस्य अच् स्यात् इति शङ्कायाः समाधानार्थम् अचः इति षष्ठ्यन्तस्यपदस्य उपस्थानं भवति। यथा - 'ह्रस्वो नपुंसके प्रातिपदिकस्य' १.२.४७ अस्मिन् सूत्रे ह्रस्व शब्दः विद्यते। अर्थात् नपुंसकलिङ्गे प्रातिपदिके स्थितस्य अचः ह्रस्वः भवेत्। विश्वपा शब्दस्य नपुंसके आकारस्य ह्रस्व अकारः भूत्वा विश्वपम् इति सिध्यति।

शममष्टानांदीर्घः श्यनि ७.३.७४ सूत्रे दीर्घशब्दस्य ग्रहणत्वात् शमामष्टानाम् अचः दीर्घः भवेत्

शम् + श्यन् (य) + तिप् = शाम्यति

वाक्यस्य टेःप्लुतः उदात्तः (८.२.८२) सूत्रे टेः अचः प्लुतः उदात्तः एव अर्थः भवति। आयुष्मन् एधि इन्द्रवर्मन् अत्र अचोऽन्त्यादिटि १.१.६ सूत्रेण शब्दस्य अन्तिमः स्वरवर्णः व्यञ्जनेन सह टिसंज्ञकः।

इन्द्रवर्मन् शब्दस्य अन् 'टि'। अत्र टे: अच: अकारस्य त्रिमात्राविशिष्ट: प्लुत: उदात्त: च भवेत् 'इन्द्रवर्मन्' इति ।

३६. आद्यन्तौ टकितौ १.१.४६ टित् कितौ यस्योक्तौ तस्य क्रमात् आद्यन्तावयवौ स्त:

आदिश्च अन्तश्च आद्यन्तौ । टश्च कश्च टकौ । टकौ इतौ (इत् (लोप) संज्ञकौ) ययो: तौ टकितौ । टित् कितौ आद्यन्तावयवौ स्त: । टित् आद्यावयव: । कित् अन्तावयव: । अर्थात् ट् इत् यस्य स: टित् । क् इत् यस्य स: कित् । यस्य टित् भवति तस्य आद्यावयवं प्रति आगम: भवति, यस्य कित् भवति तस्य अन्तावयवं प्रति आगम: भवति ।

उदाहरणम् - वृक्षशब्दस्य षष्ठी बहुवचने वृक्ष + आम् । 'ह्रस्वनद्यापो नुट्' ७.१.५४ सूत्रेण आम: नुडागम: (नुट् + आगम:) भवति । नुट् टित् हेतो: 'आम्' इत्यस्य आद्यावयव: भवेत् वृक्ष + नुट् (न्)+ आम् वृक्षाणाम्

'ङणो: कुक् टुक् शरि' ८.३.२८ सूत्रेण शर (श, ष, स) परे स्थिते पूर्ववर्त्तिन: पदान्तस्थस्य ङस्य कु, क् (कित्) णस्य टुक् (कित्) आगम: भवति । कुक् (कित्) टुक् (कित्) हेतो: अन्तावयवं प्रति आगम: भवति - यथा - प्राङ् + षष्ठ: = प्राङ् + कुक् (क) + षष्ठ: = प्राङ्कषष्ठ: । सुगण् + षष्ठ: = सुगण् + टुक् (ट) + षष्ठ: = सुगण्ट्षष्ठ:

३७. मिदचोऽन्त्यात् पर: १.१.४७ अच: इति षष्ठयन्तम् । अचां मध्ये य: अन्त्य: तस्मात् पर: तस्य एव अन्तावयव: मित् स्यात् ।

मित् + अच: + अन्त्यात् । म् इत् यस्य स: मित् पदनिर्माणे शब्दस्य अन्त्यस्वरात् परं मित् इत्यस्य आगम: भवति, यथा - पयांसि, पयस् + जस् इति स्थिते क्रमश: शब्दसाधन प्रणाली द्वारा नपुंसकस्य झलय: १.१.७७ सूत्रेण नुम् (मित्) आगम: भवति । पयस् शब्दस्य अन्त्यस्वरवर्णात् परं नुम् (न) अन्तावयवरूपेण गृहीत: । पय + नुम् (न) + स + जस् (इ) - एवं क्रमेण विविधै: सूत्रै: पयांसि इति पदं सिध्यति ।

३८. षष्ठीस्थानेयोगा १.१.४९ अनिर्धारितसम्बन्धविशेषा षष्ठीस्थानेयोगा' बोध्या । स्थानञ्च प्रसङ्ग: ।

यत्र सम्बन्धविशेष: निर्धारित: नास्ति, तत्र किमर्थं षष्ठी विभक्ति: भवति इति शङ्कायां स्थानेयोगा अर्थात् प्रसङ्ग सम्बन्धीया इति बोध्या भवेत् । संस्कृते स्वस्वामिभावादिसम्बधा: विविधा: भवन्ति, यत्र निर्धारित रूपेण सूचना न स्यात् तदा षष्ठी - निर्धारित वर्णस्य स्थाने व्यवहृताभवेत् - यथा **इकोयणचि** इक: स्थाने यण् स्थाने अचि संहितायां विषये इत्यर्थ: ।

३९. स्थानेऽन्तरतम: १.१.५० प्रसङ्गे सति सदृशतम: आदेश:स्यात् । यत्रानेकविधमान्तर्यं तत्र स्थानत: आन्तर्यं बलीय: ।

आन्तर्यं नाम सादृश्यम् । स्थानगत - अर्थगत गुणगत प्रमाणगतादि भेदेन सादृश्यं चतुर्विधम्। एकस्मिन् स्थले विविधकारणवशात् अनेकादेशप्रसङ्गे आगते तत्र केवलं सदृशतमः आदेशः भवेत् । उदाहरणम् - स्थानगतसादृश्यम् - दधि + अत्र इति स्थिते 'इको यणचि' सूत्रेण इकः यण् आदेशे प्राप्ते उच्चारण स्थानस्य साम्यत्वात् 'इ' स्थाने सदृशतमस्य 'य्' कारस्य आदेशः सन् दध्यत्र पदं सिध्यति । यण् मध्ये य व र ल वर्णाः सन्ति तथापि इचुयशानां तालु इति इकार यकारयोः उच्चारणस्थानसाम्यात् एव यकारः गृहीतः न तु व र ल प्रभृतयः ।

अर्थगतसादृश्यम् - तृज्वत् क्रोष्टुः ७.१.९५ सूत्रेण क्रोष्टु शब्द स्थाने तदर्थक- तृजन्त कोष्टृशब्दस्य आदेशः भवति। क्रोष्टु - कोष्टृ उभयोः शृगाल इति अर्थगत सादृश्यं विद्यते । तदर्थम् उकारान्त क्रोष्टु शब्दस्य क्रोष्टा, क्रोष्टारौ क्रोष्टारः इत्यादीनि रूपाणि भवन्ति ।

गुणगतसादृश्यम् - गुणशब्दस्यार्थः प्रयत्नः । वाक् + हरिः इति स्थिते । हकारस्थाने तादृशगुणविशिष्टस्य घकारस्य आदेशः भवति । पुनश्च 'क्' कारस्य गकारः भवति । ततः वाग्घरिः इति पदं सिध्यति ।

प्रमाणगतसादृश्यम् - प्रमाणं नाम परिमाणम् । यथा यावत्मात्राविशिष्टः शब्दः स्यात् तत् स्थाने तावन्मात्राविशिष्टवर्णस्य आदेशः भवति । यथा- अमू, अमुम् । अदस् + औ इति स्थिते साधनसूत्रेण औकारस्य दीर्घमात्रात्वात् ऊ कारस्य आदेशः भवति ततः अमू इति पदं सिध्यति । अदस् + अम् इति स्थिते तथैव साधनसूत्रेण अकारस्य ह्रस्वत्वात् अमुम् भवति ।

तमब्ग्रहणं किम् इति शङ्कायां यत्रानेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं नाम सादृश्यमेव ग्रहणीयम् इत्यर्थः ।

यथा चेता- चि + तृच् (ता) । अत्र सार्वधातुकार्ध धातुकयोः ७.३.८४ सूत्रेण 'चि' स्थितस्य इकारस्य गुणः भवति । अदेङ्गुणः सूत्रानुसारम् अ.ए.ओ त्रयः गुणवर्णाः इ ह्रस्ववर्णत्वात् प्रमाण सादृश्येन अकार गुणवर्णः भवेत् । पुनश्च 'इ' कारस्य गुणवर्णस्य एकारस्य स्थानगतं सादृश्यम् अस्ति । इचुयशानां तालु एदैतौ कण्ठतालू । अत्र इकार एकारौ तालव्यवर्णौ । ततः स्थातगत सादृश्यत्वात् प्राधान्येन इकारस्थाने एकारः भूत्वा चेता पदं सिध्यन्ति । तथैव स्तु + तृच् = स्तोता प्रभृतयः शब्दाः स्थानतः आन्तर्यबलेन सिध्यन्ति ।

**४०. तस्मिन्निति निर्दिष्टे पूर्वस्य - १.१.६६**

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण अव्यवहितस्य पूर्वस्य बोध्यम् ।

सप्तमी विभक्ति निर्देशेन यस्य कार्यस्य विधानं भवति तत्र अन्यवर्णद्वारा अव्यवहितस्य पूर्ववर्णस्य विधानं भवति । नतु परवर्णस्य । यथा - 'इको यणचि' । अत्र अचि सप्तमीनिर्दिष्टपदेन पूर्वस्य इकः स्थाने यण् आदेशः भवति । दधि + अत्र इति स्थिते पूर्वस्य इक् स्थाने यण् आदेशः भवति - दध्य् + अत्र = दध्यत्र दधि + उदकम् । दध्युदकम् । अत्रापि पूर्ववर्णस्य इकार स्यस्थाने यण् आदेशः नतु परवर्णस्य अकारस्य स्थाने यण् आदेशः भवति ।

४१. तस्मादित्युत्तरस्य १.१.६७

पञ्चमीनिर्द्देशेन क्रियमाणं कार्यं वर्णान्तरेण अव्यवहितस्य परस्य ज्ञेयम् ।

तस्मात् इति पञ्चमीविभक्त्यन्तस्य अनुकरणम् । यत्र पञ्चमी विभक्तिद्वारा निर्दिष्टकार्यविधानं भवति तत्र तस्य वर्णस्य अव्यवहितस्य (व्यवधानरहितस्य) परवर्त्तिनः (उत्तरस्य)वर्णस्य एवभवति । यथा - उत्थानम् । अत्र उत् + स्थानम् इतिस्थिते 'उदः स्थास्तम्भोः पूर्वस्य' इति सूत्रानुसारम् उदः (उत् - परवर्त्तिनः) स्था - स्तम्भ धात्वोः पूर्वस्य सवर्णः भवति । तर्हि पूर्वस्य पूर्वसवर्णः भविष्यति अथवा परस्य पूर्वसवर्णः भविष्यति इति संशयः । ततः तस्मादित्युत्तरस्य परिभाषा द्वारा उत्तरस्य नाम परस्य अर्थात् उदः पञ्चमी विभक्त्यन्तत्वात् व्यवधान रहितस्य स्था इत्यस्य पूर्वसवर्णः भविष्यति पुनरपि सन्देहः स्कारस्य थ्कारस्य वा पूर्वसवर्णः भविष्यति तत्र **'आदेः परस्य'** सूत्रेण परवर्णस्थले आदेः इति पञ्चमी विभक्त्यन्तरूपं ग्रहणीयम् । ततः स् कारस्य पूर्वसवर्णादेशः 'थ्' भवति । पुनश्च 'झरो झरि सवर्णे सूत्रेण 'थ' कारस्य (थकारेण परिवर्त्तितस्य सकारस्य) लोपः भवति ततः उत्थानम् इति पदं सिध्यति ।

४२. अलोऽन्त्यस्य १.१.५२

षष्ठी निर्द्दिष्टस्य अल आदेशः स्यात् । अलः + अन्त्यस्य । अलः इति अइउणतः अकारतः आरभ्य माहेश्वरसूत्रस्य हल् पर्यन्तम् वर्णानाम् षष्ठी निर्द्देशेन यस्य कार्यविधानं भवति तत्र अन्त्यम् अल् इति ज्ञेयम् । उदाहरणम् 'त्यदादीनामः' ७.२.१०२ त्यद् तद् यद् एतद् इदम्, अदस् एक द्वि एतेषाम् अन्त्यस्य अलः (वर्णस्य)स्थाने 'अ' आदेशः भवति विभक्ति चिह्नेपरेस्थिते । त्यदादीनाम् - अत्र षष्ठी निर्देशत्वात् अलोऽन्त्यस्य सूत्रबलेन 'अ' आदेशः 'अल्' स्थाने एव भवति । एवं क्रमेण तद् शब्दस्य दकारस्य अकारः भवति, त + अ + सु इति स्थिते 'तदोः सः सावनन्त्ययोः' ७.२.१०६ सूत्रेण स आदेशः भूत्वा 'सः' इति सिध्यन्ति ।

४३. ङिच्च १.१.५३

अयमप्यनन्त्यस्यैव स्यात् अनेकाल्शित् सर्वस्य (सू -४५) इत्यस्यापवादः ।

ङकारः इत् यस्य सः ङित् । ङित् + च = ङिच्च अयम् + अपि + अन्त्यस्य (वर्णस्य) + एव स्यात् । ङित्- आदेशः अन्त्यवर्णस्य कृते एव विहितः भवति । यथा गवाग्रम् । गो + अग्रम् इतिस्थिते 'अवङ् स्फोटायनस्य' सूत्रानुसारं 'गो' शब्दस्य अवङ् आदेशः भवति । ङित् हेतोः 'गो' शब्दस्य अन्त्यवर्णस्य ओकारस्य अवङ् भवति ग् + अवङ् + अग्रम् = ग् + अव + अग्रम् = गवाग्रम् इति सिध्यति

अपवादस्य अर्थः भवति अपोद्यते बाध्यते अनेन इति अपवादः । 'अनेकाल्शित् सर्वस्य' सूत्रेण सर्वस्य (समुदायस्य) आदेशः भवति किन्तु ङिच्च सूत्रे तद् बाधक रूपेण केवलम् अन्त्यस्य वर्णस्य आदेशः भवति ।

४४. आदेः परस्य १.१.५४

परस्य यद्विहितं तत्तस्य आदेः बोध्यम् । 'अलोऽन्त्यस्य (सू ४२) इत्यस्य अपवादः । परवर्त्तिनः शब्दस्य कृते विहितं कार्यं तस्य शब्दस्य आदिवर्णनिमित्तम् एव । उदाहरणम् 'द्व्यन्तादरुपसर्गेभ्योऽप ईत्' सूत्रानुसारं द्वि अन्तर् उपसर्गेभ्यः परस्थितस्य अपशब्दस्य ईत् भविष्यति । ततः द्वि + अप इति स्थिते अपशब्दस्य अकारे पकारे समुदाये वा ईकारादेशः भविष्यति इति शङ्कायाम् 'आदेः परस्य' सूत्रेण आद्यस्य अकारस्य एव ईकारादेशः स्यात् । ततः द्वि + ईप = द्वीप इति पदं सिध्यन्ति । (उत्थानम् उत्तम्भनम् प्रभृति शब्दनिर्माणे उदः स्थास्तम्भोः पूर्वस्य सूत्रेण पूर्वसवर्णविधाननिमित्तम् 'आदेः परस्य' सूत्रानुसारम् स्था-स्तम्भधात्वोः आदिस्थितस्य सकारस्य पूर्वसवर्णादेशः भवति) अवश्यम् एतत् सूत्रम् 'अलोऽन्त्यस्य' अपवादः ।

४५. अनेकाल्शित्सर्वस्य १.१.५५ स्पष्टम्, अलोऽन्त्य सूत्रापवादः । अष्टाभ्य औश् (सू ३७२) इत्यादौ आदेः परस्य (सू ४४) इत्येतदपि परत्वात् अनेन बाध्यते ।

अनेक + अल् + शित् + सर्वस्य । न एकः अनेकः । अनेकः अल् यस्य सः अनेकाल् शकारः इत् यस्य सः शित् । अनेकाल् शित् च यस्य विहितौ तस्य सर्वस्य (समुदायस्य) स्थाने भवतः इत्यर्थः । अनेकाल् इत्यस्य उदाहरणम् - 'अतो भिस् ऐस्' इत्यत्र बालक + भिस् (तृतीया बहुवचने) इति स्थिते भिसः स्थाने अनेकाल् (अनेक वर्ण विशिष्टः) ऐस् आदेशः भूत्वा बालकैः इति सिध्यति । पुनश्च 'अस्तेर्भूः'सूत्रेण अस् धातोः स्थाने भूः इति अनेकवर्ण विशिष्टः आदेशः भवति । यतः अस् लृटि भविष्यति... भविष्यतः भविष्यन्ति - इति रूपाणि भवन्ति । शित् - इत्यस्य उदाहरणम् 'अष्टाभ्य औश्' अनेन सूत्रेण अष्टन् शब्दात् जश्शसो औशादेशः भवति । औशः शित्त्वात् समुदायस्य जसः शसः वा आदेशः ।

अष्टन् शब्दस्य 'अष्टन् आ विभक्तौ' सूत्रेण अष्टा भवति अष्टा + जस् (औश्) = अष्टौ, अष्टा+शस (औश) अष्टौ । इति सिध्यति ।

४६. स्वरितेनाधिकारः १.३.११

स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यम् । परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः । (प. ३९) असिद्धं बहिरङ्गमन्तरङ्गे (प. ५१) अकृतव्यूहाः पाणिनीयाः (प ५७) । निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तंकार्यं न कुर्वन्तीत्यर्थः ।

स्वरितेन + अधिकारः = स्वरितेनाधिकारः ।

स्वरितेन चिह्नेन पाणिनिमहर्षिणा विविधानि सूत्राणि निर्दिष्टानि । तानि सूत्राणि अधिकारसूत्राणि । अन्यसूत्रापेक्षया तानि सूत्राणि बलवत्तराणि ।

अष्टाध्यायी सूत्रविन्यासे (१) पूर्वापेक्षया परसूत्रं बलवत्तरम् । (२) परसूत्रापेक्षया नित्यसूत्रं बलवत्तरम्, (३) परसूत्रापेक्षया अन्तरङ्गसूत्रं बलवत्तरम्, (४) परसूत्रापेक्षया अपवादसूत्रं बलवत्तरम् (५) नित्यसूत्रापेक्षया अन्तरङ्गसूत्रं बलवत्तरम् (६) अन्तरङ्गसूत्रापेक्षया अपवाद सूत्रं बलवत्तरम्

**१ - पूर्वसूत्रापेक्षया परसूत्रं बलवत्तरम् -**

विप्रतिषेधे परं कार्यम् न्यायेन 'आदेः परस्य' १.१.५४ सूत्रापेक्षया अनेकाल्शित्सर्वस्य १.१.५५ परसूत्रंबलवत्तरम् । यतः 'अष्टाभ्य औश्' सूत्रेण अष्टा + जस् इति स्थिते आदेः परस्य सूत्रानुसारं जस् इत्यस्य आदिवर्णे 'ज' स्थाने औश् आदेशः न भूत्वा अनेकाल् शित् सर्वस्य' सूत्रेण सर्वस्य नाम समुदायस्य जस् स्थाने औश् आदेशेन अष्टा + औश् (शित्) = अष्टौ इति रूपं सिध्यति ।

**२- परसूत्रापेक्षया नित्यसूत्रं बलवत्तरम्**

कृताकृतप्रसङ्गी यो विधिः स नित्यः । अर्थात् कृते प्राप्तिः अकृतेऽपि प्राप्तिः उदाहरणम् - तुदति । तुद् + तिप् इति स्थिते **'पुगन्तलघूपधस्य च'** सूत्रेण लघूपधगुणप्राप्ते पुनरपि **तुदादिभ्यः शः'** सूत्रेण 'श' विकरण प्राप्तिः भवति । अतः नित्यसूत्रप्रभावेण तुद् + श + तिप् = तुद् + अ + ति = तुदति रूपं सिध्यति ।

**३. परसूत्रापेक्षया अन्तरङ्गसूत्रं बलवत्तरम् -** यथा उभये । उभय शब्दस्य बहुवचने रूपमेतत् । विभक्ति-निरपेक्षत्वमन्तरङ्गम् । यत्सूत्रं विभक्तिं नापेक्षते तत् अन्तरङ्गम् । उभय + जस् इति स्थिते 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' सूत्रेण विकल्पेन जसः सर्वनामसंज्ञा भवति । ततः 'सर्वादीनि सर्वनामानि' सूत्रेण उभय शब्दस्य (तय प्रत्ययान्त शब्दत्वात्) सर्वनामसंज्ञा विहिता । फलेन 'जशशसोः शिः' सूत्रेण सर्वनामसंज्ञा विधीयते ।ततः अत्र किम्भूतं सूत्रं यथार्थ भविष्यति इति शङ्कायां विभक्तिनिरपेक्षत्वम् अन्तरङ्गत्वम् इति नियमानुसारम् अन्तरङ्गत्वं सिध्यति तेन च नित्यं 'शि' आदेशे उभये इति पदं सिध्यति । उभये देवमनुष्याः इति शुद्धम् ।

**४. परसूत्रापेक्षया अपवादसूत्रं बलवत्तरम् -** यथा दध्ना - दधि + टा (तृतीया - एकवचने) इति स्थिते 'अस्थिदधि सक्थ्यक्षणामनङुदात्तः सूत्रेण प्रथमाद्वितीया विभक्ती विहाय अजादिसुप्विभक्तिषु अनङ् आदेशः भवति अनेकाल्शित् सर्वस्य परिभाषासूत्रेण समग्र दधि शब्दस्य अनङादेशः प्राप्नोति । पुनश्च ङित्वात् ङिच्च इति सूत्रेण दधि शब्दोत्तरवर्तिनः इकारस्य एव अनङ आदेशः प्राप्नोति । अतः आशङ्कायां ङिच्च इत्यस्य अपवादत्वात् अधिकतया प्रामाण्यं स्वीक्रियते । तेन इकारस्य अनङ् आदेशे 'दध्ना' इति पदं सिद्धं भवति

**५. नित्यसूत्रापेक्षया अन्तरङ्गसूत्रं बलवत्तरम् -** यथा ग्रामणिनीकुले । अत्र ग्रामणी + औ इति स्थिते 'इकोऽचिनुम् विभक्तौ' इति सूत्रेण नुमागमः प्राप्नोति । तथा च 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति सूत्रेण इकारस्य ह्रस्वत्वं प्राप्नोति । अतः कस्य सूत्रस्य प्रभावः बलवान् इति शङ्कायां ह्रस्वो नपुंसके प्रातिपदिकस्य

इतिसूत्रस्य विभक्ति निरपेक्ष भावात् अन्तरङ्गत्वात् ईकारस्य ह्रस्वविधानं भवति ततः परम् 'इकोऽचिनुम् विभक्तौ सूत्रेण नुमागमः भवति, ततः ग्रामणिनी पदं सिध्यति ।

६. **अन्तरङ्गसूत्रापेक्षया अपवादसूत्रं बलवत्तरम्** - यथा - मुनि + ईशः इत्यत्र इको यणाचि' - सूत्रेण नकारोत्तरवर्त्तिनः इकारस्य यण् आदेशे प्राप्ते अकः सवर्णे दीर्घः इति सूत्रेण इकार - ईकारयोः दीर्घैकादेशः प्राप्नोति । अतः केन सूत्रेण अत्र किं विधेयम् इति शङ्कायां यद्यपि विभक्ति निरपेक्षतया 'इको यणचि' इति सूत्रमिदम् अन्तरङ्गं तथापि 'अकः सवर्णेदीर्घः' इति तु तस्य अपवादसूत्रमिति हेतोः अस्य सूत्रस्य प्राप्तिः । ततः मुनीशः इति पदं सिध्यति ।

**असिद्धं बहिरङ्गमन्तरङ्गे** - बहिरङ्गापेक्षया अन्तरङ्गं बलवत्तरम् । बह्वपेक्षत्वंबहिरङ्गत्वम् । अल्पापेक्षत्वम् अन्तरङ्गत्वम् । अन्तरङ्गविधौ बहिरङ्गम् असिद्धात् । यथा- उभये देवमनुष्याः इत्यत्र प्रथम चरम... इत्यादिसूत्रेण उभय शब्दस्य 'जस्' विभक्तौ विकल्पेन सर्वनामसंज्ञा भवति । प्रथम चरम... सूत्रं निर्दिष्टविभक्तिम् अपेक्षते अतः तदेव बहिरङ्गम् । किन्तु 'सर्वादीनि सर्वनामानि' सूत्रं कामपि विभक्तिं नापेक्षते अतः अन्तरङ्गम् । अन्तरङ्गं बहिरङ्गापेक्षया बलवत्तरमिति हेतोः नित्येन सर्वनामसंज्ञया उभये इति पदं सिध्यति । अकृतव्यूहाः पाणिनीयाः, निमित्तं विनाशोन्मुखं दृष्ट्वा तत् प्रयुक्तं कार्यं न कुर्वन्ति इत्यर्थः ।

पाणिनीयाः वैयाकरणाः वस्तुतः तर्कव्यापारे विमुखाः । विशिष्टः ऊहः अथवा विफलः ऊहः इति व्यूहः । अकृतः व्यूहः यैः ते एव पाणिनीयाः । किमपि निमित्तं विनाशोन्मुखं दृष्ट्वा तत् निमित्तम् आधारीकृत्य किमपि कार्यं कुर्वन्ति । यथा - निषेदुषः इत्यत्र नि + सिद् + वस् (क्वसु) + शस् इति स्थिते, आर्धधातुकस्येड्बलादेः इति सूत्रेण इडागमे प्राप्ते 'वसोः सम्प्रसारणम्' इत्यनेन सूत्रेण 'व' कारस्य सम्प्रसारणे 'उ' कारस्य प्राप्तिः भवति । अतः व इति निमित्तमाधारीकृत्य यः इडागमः सम्भावितः आसीत्, स न भवेत् ।यतः निमित्तस्य व कारस्य विनाशः (अदर्शनम्) - सम्प्रसारणम् इत्यर्थः स्यात् । अतः तद् विनाशोन्मुखं दृष्ट्वा तत् प्रयुक्तम् इडागमरूपकं कार्यं न कुर्वन्ति पाणिनेः शिष्याः पाणिनीया इति ।

## UNIT-- II

# अच् सन्धिप्रकरणम्।

**"संहितैकपदे नित्या नित्या धातूपसर्गयोः , नित्या समासे वाक्ये तु सा विवक्षामपेक्षते"।** इति प्रमाणात् एकपदादिषु सन्धिः नित्यः। तस्मात् संज्ञाप्रकरणे संहितासंज्ञायाः उपयोगितायाः निर्वचनानन्तरं पञ्चविधेषु सन्धिषु स्वरवर्णानां प्राथमिकताकारणात् तत्रादौ अच् सन्धिप्रकरणं प्रारभ्यते।

**47-इकोयणचि- 6-1-77.** इकः , यण् , अचि इति पदत्रयम्। विधिसूत्रमिदम्। संहितायाम् इति अनुवृत्तम्। इकः इति षष्ठ्यन्तं पदम्। अतः षष्ठी स्थानेयोगा इति परिभाषया स्थाने इति पदं लभ्यते। अतः सूत्रार्थः फलितः इकः स्थाने यण् स्यात् अचि संहितायां विषये। अर्थात् इ उ ऋ लृ- वर्णानां क्रमेण य् व् र् ल् आदेशाः स्युः। तेन सुधी +उपास्यः इति स्थिते ईकारस्य स्थाने य् कारादेशे सुध् य् उपास्यः इतिजाते **48.अनचिच-8/4/48.** अनचि, च इति पदद्वयम् । यरः , वा, अचः द्वे इति अनुवृत्तम्। अचः परस्य यरो द्वे वा स्तो न त्वचि इति सूत्रार्थः तेन ध् कारस्य द्वित्वम्। सुध् ध् उपास्यः इति अवस्थायां **.झलां जश् झशि-8/4/53//** झल् वर्णानां स्थाने जश् वर्णाः स्युः इति। तेन प्रथमधकारस्य स्थाने दकारादेशे वर्णसम्मेलनेन सुद्ध्युपास्यः इति पदं सिद्धम्।

तथैव मधु+ अरिः इत्यत्र उकारस्य स्थाने व् कारादेशे मद्ध्वरिः ,धातृ+ अंशः इत्यत्र ऋकारस्य स्थाने र् आदेशे धात्त्रंशः इत्यादीनि पदानि सिद्धानि।**48- अनचि च – 8/4/47//**अचः परस्य यरो द्वे वा स्तो न त्वचि इति धकारस्य द्वित्वम् ।

**49-स्थानिवदादेशोनल्विधौ-1/1/5//** स्थानिवत्, आदेशः , अनल्विधौ इति पदत्रयम्। अतिदेशसूत्रमिदम्। आदेशः स्थानिवत्स्यात् न तु स्थान्यलाश्रयविधौ । अनेनेह

यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्य अनचि इति द्वित्वनिषेधो न शङ्क्यः , अनल्विधौ इति तन्निषेधात् ।

**50—अचः परस्मिन्पूर्वविधौ- 1/1/57//** अल्विध्यर्थमिदम् । परनिमित्तोऽजादेशः स्थानिवत्स्यात् , स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये ।इति यणः स्थानिवद्भावे प्राप्ते ।

51.**पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु 1/1/58//** पदस्य चरमावयवे द्विर्वचनादौ च कर्त्तव्ये परनिमित्तोऽजादेशो न स्थानिवत् । इति स्थानिवद्भावनिषेधः ।

**52-झलां जश् झशि -8/4/53//** झलां स्थाने जश् स्यात् झशि परतः स्पष्टार्थम् । इति धकारस्य दकारः ।

53- अदर्शनं लोपः – 1/1/60// प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ।

**54- संयोगान्तस्य लोपः – 8/2/23//** संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात् । इति यलोपे प्राप्ते यणः प्रतिषेधो वाच्यः । तदिह धकारयकारयो र्द्वित्वविकल्पाच्चत्वारि रूपाणि । सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः ।

**55- नादिन्याक्रोशे पुत्रस्य – 8/4/48//** पुत्रशब्दस्य न द्वे स्त आदिनीशब्दे परे आक्रोशे गम्यमाने । पुत्त्रहती- पुत्रहती ।

**56 – त्रिप्रभृतिषु शाकटायनस्य- 8/4/50//** त्रिचतुरादिषु हल्षु संयुक्तेषु आद्यस्य अचः परस्य यरः द्वित्वं शाकटायनमते । मतान्तरे तु नेत्यर्थः। इन्न्द्रः – इन्द्रः । राष्ष्ट्रम् – राष्ट्रम् ।

**57 – सर्वत्र शाकल्यस्य – 8/4/51//** नेत्यनुवर्तते । यत्र यत्र द्वित्व विहितं तत्र तत्र शाकल्यस्य ऋषेर्मते न भवतीत्यर्थः । अर्कः । ब्रह्मा ।

**58- दीर्घादाचार्याणाम् – 8/4/52//** द्वित्वं न । दात्रम् । पात्रम् ।

**59-अचो रहाभ्यां द्वे-8/4/46//** अचः , रहाभ्यां , द्वे । इति पदत्रयं विद्यते यरः , वा इति अनुवृत्तम्। विधिसूत्रमिदम्। अचः इति पञ्चम्यन्तं पदं तस्मादुक्तम् अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। अर्थात् स्वरवर्णानाम् अव्यवहितोत्तरवर्तमानयोः रेफहकारयोः अनन्तरं वर्तमानानां यर् वर्णानां विकल्पेन द्वित्वविधाननिमित्तं सूत्रमिदं विहितम्। तेन हरि +अनुभवः इति स्थिते इको यणचि इति सूत्रेण इकारस्य स्थाने य् कारादेशे अनेन सूत्रेण य् कारस्य विकल्पेन द्वित्वे हर्य्यनुभवः , हर्यनुभवः इति पदद्वयं सिद्धम् ।

**60 – हलो यमां यमि लोपः – 8/4/64//** हलः परस्य यमो लोपः स्याद्वा यमि । इति लोपपक्षे द्वित्वाभावपक्षे चैक्यं रूपं तुल्यम् ।

**61- एचोऽयवायावः –6/1/78//** एचः अयवायावः इति पदद्वयात्मकं विधिसूत्रमिदम् । अचि , संहितायाम् इति पदद्वयम् अनुवर्तते । अय् च अव् च आय् च आव् चेति विग्रहः । यथासंख्यमनुदेश समानाम् इति परिभाषया एकारस्य अय्, ओकारस्य अव्, ऐकारस्य आय् , औकारस्य आव् एते आदेशाः लभ्यन्ते । तदाह एचः क्रमात् अय् अव् आय् आव् एते स्युरचि ।हरे+ ए = एकारस्य स्थाने अय् आदेशे हरये इति सिद्धम् । विष्णो+ ए= ओकारस्यस्थाने अव् आदेशे विष्णवे इति साधुः । नै+ अकः इत्यत्र ऐकारस्य आय् आदेशे नायकः इतिपदं जातम् । पौ+ अकः इतिस्थिते औकारस्य आव् आदेशे पावकः इति सिद्धम् ।

**62 – तस्य लोपः – 1/3/9//** एतेष्वादेशेषु यकारवकारयोर्हलन्त्यमिति इत्संज्ञायां लोपमाशङ्कितुमाह- तस्येतो लोपः स्यात् । इति यवयोर्लोपो न। उच्चारणसामर्थ्यात् । एवं च इत्संज्ञापीह न भवति । हरये , विष्णवे। **63- वान्तो यि प्रत्यये-6/1/79//.** वान्तः , यि , प्रत्यये , इति पदच्छेदः यि इति सप्तम्यन्तं पदम् ।

तेन यकारादौ इति लभ्यते । यकारादौ प्रत्यये परे ओदौतोः अव् आव् एतौ स्तः । गोर्विकारः इत्यर्थे गोशब्दात् यत् प्रत्ययकृते गो + यम् इतिस्थिते ओकारस्थाने अव् आदेशे गव्यम् इति सिद्धम् । तथा नावा तार्यं नौ+ यम् औकारस्थाने आव् आदेशे नाव्यम् इति सिद्धम् ।

**अध्वपरिमाणे च . (वा.3544.)** मार्गपरिमाणविशेषे गम्येपि यूतिशब्दे परे गोशब्दावयवस्य ओकारस्य अव् इति वान्तादेशस्य उपसंख्यानं कर्त्तव्यमित्यर्थः । गो यूतिः इत्यत्र ओकारस्य अव् आदेशे गव्युतिः इति सिद्धम् ।

64 -**धातोस्तन्निमित्तस्यैव –6/1/80//.** धातोः, तन्निमित्तस्य, एव । इति त्रिपदात्मकं नियमसूत्रम् । एचः वान्तो यि प्रत्यये इति अनुवर्तते । सः यादि प्रत्ययः निमित्तं यस्य सः तन्निमित्तः । यादि प्रत्यये परे धातोरेचश्चेत् वान्तादेशस्तर्हि तन्निमित्तस्य एव नान्यस्य । लूञ्- छेदने इति धातोः यत् प्रत्ययविधाने धातोः गुणे लो यम् इति स्थिते ओकारस्य अव् आदेशे लव्यम् इति सिद्धम् । तन्निमित्तस्यैव इति पदयोगात् ओयते इत्यादिषु प्रयोगेषु अव् आदेशः न स्यात्

65 - **क्षय्यजय्यौ शक्यार्थे -6/1/81//** द्विपदात्मकं विधिसूत्रमिदम् । शक्यार्थे क्षय्यजय्यशब्दौ वाचकतया वर्त्तते इत्यर्थः । परे स्वरवर्णाभावात् अय् आदेशस्य अनापत्तौ यान्तादेशनिपातनार्थं सूत्रमिदम् । क्षे+ यम् इति स्थिते एकारस्य अय् आदेशे क्षेय्यम् इति सिद्धम् ।शक्यार्थे इति पदयोजनात् क्षेतुं योग्यं क्षेयं पापम् , जेतुं योग्यं जेयं मनः इत्यादौ नातिव्याप्तिः ।

66 – **क्रय्यस्तदर्थे -6/1/82//** इदमपि यान्तादेशनिपातनार्थम् । तदर्थशब्दं व्याचष्टे- तस्मै प्रकृत्यर्थायेदं तदर्थम् । क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यम् । क्रेयमन्यत् । क्रयणार्हमित्यर्थः ।

**67 - लोपः शाकल्यस्य-8/3/19//.** पदद्वयात्मकं सूत्रमिदम् । अपूर्वस्य , अशि , व्योः पदस्य ,इतिपदानि अनुवर्तन्ते । तदाह अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपः अशि परे । हरे+ एहि इति स्थिते एकारस्य अय् आदेशे हर्+ अय् +एहि इति दशायां य कारलोपे सति ओमाङोश्च इति सूत्रेण पररूपापत्तिनिराकर्तुमाह पूर्वत्रासिद्धमिति । अर्थात् अच् सन्धिदृष्ट्या लोपशास्त्रस्यासिद्धत्वात् अच् सन्धिः न भवति। तेन हरएहि-हरयेहि इति सिद्धम् । तथैव विष्णो+ इह= विष्णइह -विष्णविह इति ।

**68 – एकः पूर्वपरयोः – 6/1/84//** इत्यधिकृत्य । पदद्वयात्मकं सूत्रमिदम्। उत्तरत्रानुवृत्यर्थं पठित्वा कतिपयसन्धयो विधास्यन्त इत्यर्थः ।

**69 - आद् गुणः – 6/1/87//** आत् गुणः इति पदच्छेदः , अचि इति पदम् अनुवर्तते। आत् इति पञ्चम्यन्तं पदं तथा गुणः प्रथमान्तं तेन एकः **पूर्वपरयोः 6/1/84//** इति सूत्राधिकारात् अर्थोभवति , अवर्णादचि परे पूर्वपरयोः एकः गुणादेशः( अ-ए-ओ) स्यात् संहितायां विषये । उप+ इन्द्रः=उपेन्द्रः , पकारोत्तरवर्ती अकारेण सह इकारस्य (अच् वर्ण) संयोगात् एकारः जायते। तथा, रमा+ ईशः= रमेशः गङ्गा+ उदकम् =गङ्गोदकम् । अ+ उ= ओ, अ+ ऋ= अर् ।

**70 - उरण् रपरः 1/1/51//** उः, अण् , रपरः इति पदत्रयात्मकं परिभाषासूत्रम्। स्थाने ,स्थाने इति पदद्वयमनुवर्तते । ऋकारस्य स्थाने योऽण् स रपरः सन्नेव प्रवर्तते । अत्र र इति प्रत्याहारो विवक्षितः । ततः र, ल इति - वर्णद्वयं बोध्यम्। अतः कृष्ण+ ऋद्धिः इत्यत्र अर् आदशकृते कृष्णर्द्धिः , एवम् अल् विधाने तवल्लकारः इति साधुः

**71- झरो झरि सवर्णे – 8/4/65//** हलो परस्य झरो लोपो वा स्यात् झरि। द्वित्वाभावे लोपो सत्येकधम् । असति लोपे , द्वित्वलोपयोर्वा द्विधम् । सति द्वित्वे लोपे चासति त्रिधम् । कृष्णर्धिः – कृष्णर्द्धिः ।

**72 - वृद्धिरेचि 6/1/88//** वृद्धिः एचि , अत्र पदद्वयम् , आत् इति पञ्चम्यन्तमनुवर्तते । एकः पूर्वपरयोः इति अधिकृतम् । तदाह आत् एचि परे वृद्धिरेकादेशः( आ , ऐ , औ ) स्यात् । गुणापवादः । अर्थात् स्थानेन्तरतमः इति सहकारेण अ / आ+ ए/ ऐ = ऐ, अ/आ +ओ/ औ= औ इति बोद्ध्यम् ।कृष्ण + एकत्वम्= कृष्णैकत्वम् ,गङ्गा + ओघः= गङ्गौघः, देव + ऐश्वर्यम्= दैवैश्वर्यम् , कृष्ण +औत्कण्ठ्यम् = कृष्णौत्कण्ठ्यम्।

**73 - एत्येधत्युठ्सु -6/1/89//** एतिश्च एधतिश्च ऊठ् चेति विग्रहः । वृद्धिः , एचि , आत् इति अनुवर्तते । अवर्णात् एजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् । उप + एति= उपैति , उप+ एधते= उपैधते , प्रष्ठ+ ऊहः= प्रष्ठौहः । अनेन सूत्रेण आद् गुणः इति सूत्रविहितः गुणादेशस्तथा एङि पररूपम् इति पररूपं वाधितम्।

**अक्षादूहिन्यामुपसङ्ख्यानम् – ( वा. 3604)** आदिति , अचीति , वृद्धिरिति चानुवर्तते । एकः पूर्वपरयोरिति च। ऊह –वितर्के , ऊहनम् ऊहः सोस्या अस्तीति ऊहिनी । अक्षशब्दात् ऊहीनीशब्दे परे पूर्वपरयोरचोः वृद्धिरेकादेशः स्यादित्यर्थः । अक्ष+ ऊहिनी= अक्षौहिणी , सेना ।

**प्रादूहोढोढ्येषैष्येषु ( वा.3605 )** प्र इति उपसर्गात् ऊह , ऊढि ,ऊढ ,एष , एष्य एतेषु परेषु पूर्वपरयोरचोर्वृद्धि रेकादेशः स्यात् इत्यर्थः । प्र+ ऊहः =प्रौहः प्र+ ऊढः =प्रौढः प्र+ एषः =प्रैषः प्र+ एष्यः= प्रैष्यः । अत्र पररूपगुणापवादः।

**ऋते च तृतीयासमासे –( वा. 3607.)** तृतीयासमासे अकारात् ऋतशब्दे परे पूर्वपरयोरचोर्वृद्धिः स्यात् इत्यर्थः। सुखेन ऋतः इति विग्रहे सुख+ ऋतः इति स्थिते गुणे प्राप्ते अनेन वृद्धिः आकारः रपरत्वे सुखार्तः इति रूपम् सिद्धम्। तृतीयासमासे इत्युक्ते परमश्चासौ ऋतश्चेति कर्मधारय समासे वृद्ध्यभावे गुणकार्ये परमर्तः इति रूपम् ।

प्रवत्सतरकम्वलवसनार्णदशानामृणे –( वा. 3608.) प्र , वत्सतर , कम्वल , वसन ऋण ,दश एतेषाम् ऋणशब्दे परे पूर्वपरयोरचोर्वृद्धिरेकादेशः स्यात् इत्यर्थः । प्रगतऋणमिति विग्रहे ,प्र ऋणम् इति स्थिते गुणं वाधित्वा अनेन वार्तिकेन वृद्धिः आकारः रपरत्वं प्रार्णम् इति सिद्धम् । तथा कम्वलार्णम् ,दशार्णा इत्यादिः ।

**74 - उपसर्गादृति धातौ – 6/1/91//** आद्गुणः इत्यतः आदिति पञ्चम्यन्तमनुवर्तते । तच्च उपसर्गविशेषणम् , अतस्तदन्तविधिः- अकारान्तात् इति लभ्यते। ऋतीति धातोर्विशेषणम् । यस्मिन् विधिरिति तदादिविधिः । ऋकारादाविति लभ्यते। वृद्धिः इति अनुवर्तते। एकः पूर्वपरयोः इति अधिकारात् – अवर्णान्तात् उपसर्गाद् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात् इति सूत्रार्थः। प्र+ ऋच्छति इति स्थिते गुणे प्राप्ते अनेन वृद्धिः रपरत्वम् प्रार्च्छति इति रूपम्। उप+ ऋच्छति= उपार्च्छति ।

**75 – अन्तादिवच्च – 6/1/85//** योयमेकादेशः स पूर्वस्यान्तवत् परस्यादि- वत्स्यात् । इति रेफस्य पदान्तत्वे ।

**76 – खरवसानयोर्विसर्जनीयः – 8/3/15//** रो रीत्यतः र इति षष्ठ्यन्तम् अनुवर्तते । तच्च पदस्येत्यधिकृतस्य विशेषणम् । येन विधिरिति रेफान्तस्येति लभ्यते तदाह- खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात् पदान्ते । इति विसर्गे प्राप्ते । अन्तवद्भावेन पदान्तरेफस्य न विसर्गः ।

**77 - वा सुप्यापिशलेः – 6/1/92//** अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ परे वृद्धिरेकादेशः वा स्यात् । आपिशलिग्रहणं पूजार्थम् । प्रार्षभीयति – प्रर्षभीयति ।

**78.एङि पररूपम् -6/1/94//** अत्र पदद्वयम् , आत्, उपसर्गात् , धातौ इति अनुवृत्तम्, एकः पूर्वपरयोः इति अधिकारात् अवर्णान्तात् उपसर्गात्-एङादौ धातौ परे पररूपमेकादेशः स्यात् । प्र+ एजते इति स्थिते वृद्धिरेचीति वृद्धिं वाधित्वा अनेन पररूपम् प्रेजते , उप+ ओषति= उपोषति।

**79.अचोऽन्त्यादि टि-1/1/64//** संज्ञा सूत्रम् । अचः इति निर्द्धारणे षष्ठी। अन्ते भवः अन्त्यः, अन्त्यः आदिः यस्य तत् अन्त्यादीति विग्रहः। अचां मध्ये योऽन्त्यः सः आदिर्यस्य तट्टिसंज्ञं स्यात् इति सूत्रार्थः स्पष्टम्।

**शकन्ध्वादिषु पररूपं वाच्यम्.( वा,3632.)** शकन्ध्वादिषु विषये तत्सिद्ध्यर्थं पूर्वपरयोः पररूपं वक्तव्यम् इत्यर्थः । ततश्च शकादि शब्दानां टेरचि परे टेश्च परस्याचश्च स्थाने पररूपमेकादेश इत्यर्थाल्लभ्यते  शक+ अन्धुः इति स्थिते सवर्णदीर्घे प्राप्ते अनेन पररूपैकादेशे शकन्धुः इति सिद्धम्। एवं कर्कन्धुः, पतञ्जलिः मनीषा ,हलीषा , सीमन्तः इत्यादयः।

**ओत्वोष्ठयोः समासे वा- (वा,3634.)** अवर्णात् ओतुशब्दे ओष्ठशब्दे च परे पूर्वपरयोः पररूपं वक्तव्यम् इत्यर्थः । स्थूल+ ओतुः इति स्थिते वृद्धिं वाधित्वा पररूपे कृते स्थूलोतुः , विम्व+ओष्ठः =विम्वोष्ठः इति । समासे इति पदयोजनात् तव+ ओष्ठः इत्यत्र समासाभावान्न पररूपापत्तिः। वृद्धिकार्ये तवौष्ठः इति साधुः।

**80 - ओमाङोश्च – 6/1/95//** ओम् च आङ् च इति विग्रहः। आदिति पररूपमिति चानुवर्तते , एकः पूर्वपरयोः इत्यधिकारात्- ओमि आङि – आत्परे पररूपमेकादेशः स्यात् । शिवाय+ ओं नमः वृद्धिं वाधित्वा पररूपैकादेशे शिवायों नमः , शिव+ आ +इहि इति स्थिते गुणे शिव+ एहि इत्यवस्थायां वृद्धिं वाधित्वा पररूपैकादेशे शिवेहि इति सिद्धम्।

**81- अव्यक्तानुकरणस्यात इतौ – 6/1/68//** ध्वनेरनुकरणस्य योऽच्छब्दः तस्मादितौ पररूपमेकादेशः स्यात् । पटत् इति – पटिति ।

**82- नाम्रेडितस्यान्त्यस्य तु वा – 6/1/99//** आम्रेडितस्य प्रायुक्तं न स्यात् । अन्त्यस्य तु तकारमात्रस्य वा स्यात् ।

**83- तस्य परमाम्रेडितम् – 8/1/2//** ननु किमाम्रेडितं नाम ? सर्वस्य द्वे इत्यनन्तरमिदं सूत्रं पठ्यते । ततश्च तस्येत्यनेन द्विरुक्तस्येति लभ्यते। अवयववाचिपरशब्दप्रयोगे अत एव ज्ञापकात् षष्ठी । तदाह- द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात् । पटत्पटेति।

**84- झलां जशोऽन्ते – 8/2/39//** पदान्ते झलां जशः स्युः। पटत्पटदिति ।

**85- अकः सवर्णे दीर्घः- 6/1/101//** अकः इति पञ्चम्यन्तं पदम्। अचीति अनुवर्तते । एकः पूर्वपरयोः इति अधिकृतम् , तदाह अकः सवर्णे अचि परे दीर्घ एकादेशः स्यात्। दैत्य +अरिः इति स्थिते द्वयोः अकारयोः एको दीर्घः –आकारः दैत्यारिः इति सिद्दम्। तथैव- श्री+ ईशः= श्रीशः, विष्णु+ उदयः= विष्णूदयः ।

**86- एङः पदान्तादति-6/1/109//** एङः , पदान्तात् , अति, इति पदत्रयम्। अमि पूर्वः इत्यतः पूर्वम् इति अनुवर्तते। एकः पूर्वपरयोः इति अधिकृतम्। तदाह- पदान्तात् एङः अति परे पूर्वरूपमेकादेशः स्यात्। हरे+ अव इति स्थिते अयादेशं वाधित्वा पूर्वरूपम् एकारः हरेऽव , विष्णो+ अव इत्यत्र अवादेशं वाधित्वा पूर्वरूपे ओकारजाते विष्णोऽव इति सिद्धम्।

**87- सर्वत्र विभाषा गोः-6/1/122//** पदत्रयात्मकं विधिसूत्रमिदम्। एङः , पदान्तात् , अति , प्रकृत्या इति अनुवृत्तम्। लोके वेदे च एङन्तस्य गोरति वा प्रकृति भावः स्यात्। स्वभावेनावस्थानमित्यर्थः। एवं च पूर्वरूपमवादेशश्च न भवेत् । गो+ अग्रम् इति प्रकृतिभावे गोअग्रम् इति, पूर्वरूपे गोऽग्रमिति ।

**88- अवङ् स्फोटायनस्य- 6/1/123//** पदान्तादिति, गोरिति, अचीति, चानुवर्तते। स्फोटायनस्य ऋषेः मते अवङ् , अन्यस्य तु न। ततश्च विकल्पः सिद्धः । तदाह- अचि परे पदान्ते गोरवङ् वा स्यात्। गो+ अग्रम् इति स्थिते ओकारस्य अवङ् आदेशे अनुवन्धलोपे गव+ अग्रम् इत्यत्र सवर्णदीर्घे गवाग्रम् इति साधुः ।

**89- इन्द्रे च -6/1/124//** अच् इति अनुवर्तते । तदाह- गोरवङ् स्यात् इन्द्रे । गो इन्द्रः इति स्थिते ओकारस्य अवङ् आदेशे अनुवन्धलोपे गव इन्द्रः इत्यवस्थायां आद् गुणः इति गुणैकादेशे गवेन्द्रः इति सिद्धम्।

<u>इति अच् सन्धिप्रकरणम् ।</u>

## UNIT – III.

### कारकप्रकरणम् ।

तत्र प्रथमादिसप्तम्यन्तसप्तविभक्तीनामर्थविशेषव्यवस्थां दर्शयितुं प्रथमाविभक्तिमुपक्रमते।532- **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा -2/3/46//** प्रातिपदिकार्थश्च लिङ्गं च परिमाणं च वचनं चेति द्वन्द्वः । प्रातिपदिकार्थलिङ्गपरिमाणवचनानि एव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम् इति अस्वपदविग्रहः। मात्र शव्दस्य प्रत्येकं योगः, तेन प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे , वचनमात्रे प्रथमा इत्यर्थः । उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम्। प्रातिपदिकार्थमात्र इत्यस्योदाहरणम् । लिङ्गमात्रस्य- तटः-तटी –तटम्। परिमाणमात्रे द्रोणो व्रीहिः । वचनं संख्या – एकः । द्वौ । वहवः ।

**533- सम्बोधने च-2/3/47//** सम्यक् बोधनं सम्बोधनम्, अभिमुखीकृत्य ज्ञापनमित्यर्थः। सम्बोधने अधिके गम्येपि प्रथमा स्यादित्यर्थः । हे राम मां पाहीति शेषः। इह रामं प्रतिमद्रक्षणं ज्ञाप्यम् ।

**534- कारके-1/4/23//** इति अधिकारसूत्रम्। क्रियाजनकं कारकम् ,करोति- क्रियां निवर्तयति इति भाष्ये व्युत्पत्तिदर्शनात् । ब्राह्मणस्य पुत्रं पश्यति ब्राह्मणस्य अन्यथासिद्धत्वात् न कारकत्वम् ।

**535- कर्तुरीप्सिततमं कर्म- 1/4/49//** कारके इति अनुवृत्तं प्रथमया विपरिणम्यते । आप्तुमिष्यमाणम्–अभीप्सितम् । अतिशयेन ईप्सितम् ईप्सिततमम्। केनाप्तुमित्याकाङ्क्षायां कर्तृविशेषणीभूतव्यापारेण इत्यर्थात् लभ्यते , तत् फलितमाह- कर्तुःक्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ।

**536- अनभिहिते-2/3/1//** इति अधिकारसूत्रम् । इत्यधिकृत्य ।

**537- कर्मणि द्वितीया-2/3/2//** अनभिहिते इत्यधिकृत्य- अनुक्ते कर्मणि द्वितीया स्यात् इति सूत्रार्थः स्पष्टः । हरिं भजति । अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे प्रथमैव। अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैः । यथा- तिङ्- हरिः सेव्यते। कृत्- लक्ष्म्या सेवितः । तद्धित- शतेन क्रीतः शत्यः । समास- प्राप्तःआनन्दो यं स प्राप्तानन्दः ।

**538- तथायुक्तं चानीप्सितम् -1/4/50//** तथायुक्तं ,च , अनीप्सितम् इति पदत्रयम् । कर्म , कारके इति अनुवृत्तम् । ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् इत्यर्थः । ग्रामं गच्छन् तृणं स्पृशति । ओदनं भुञ्जानो विषं भुङ्क्ते। संयोगानुकूलव्यापारः स्पृशेरर्थः अत्र स्पृश्यमानस्य तृणस्य ईप्सिततमत्वाभावेऽपि अनेन सूत्रेण कर्मसंज्ञात्वात् द्वितीयाविभक्तिः ।

**539- अकथितं च-1/4/51//** अपादानम् संप्रदानम् अधिकरणम् कर्म करणं कर्त्ता इति कारकाणि। तदेतद् यदा अपादानत्वात् विशेषात्मना न विवक्षतं, किन्तु सम्बन्धसामान्यात्मनैव तदा तत् कर्मसंज्ञकमित्यर्थः।

**"दुह्याच्पच्दण्ड् रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।**
**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्" ।।**

वार्तिकार्थसङ्ग्रहश्लोकोऽयम्। दुह्-प्रपूरणे, डुयाच्-याच्ञायाम्, डुपचष्- पाके, दण्ड - दण्डनिपातने , चुरादि – निग्रहइत्यर्थः , रुधिर् – आवरणे , प्रच्छ –ज्ञीप्सायाम् , चिञ् – चयने ,ब्रूञ् –व्यक्तायांवाचि , शासु-अनुशिष्टौ , जि- अभिभवे, मन्थ- विलोडने, मुष-स्तेये , इतिद्वादशानां धातूनामित्यर्थः । णीञ् –प्रापणे हृञ्- हरणे, कृष्-विलेखने, वह-प्रापणे इति चतुर्णामित्यर्थः । दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्म इति परिगणनं कर्त्तव्यमित्यर्थः। गां दोग्धि पयः। क्षरणानुकूलव्यापारः दुहेरर्थः। क्षरणात्मकफलाश्रयत्वात्पयः कर्म। गोस्तु क्षरणे

अपादानम्। तदपादानत्वमुपेक्ष्य सम्बन्धित्वात्मना गोर्विवक्षायां कर्मत्वमनेन भवति। ततः शेषषष्ठी निरासे द्वितीया भवति। वलिं याचते वसुधाम् । तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। ब्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति । वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते, शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति। ग्राममजां नयति, हरति, कर्षति ,वहति वा ।

**540- गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ – 1/4/52//** गतिश्च बुद्धिश्च प्रत्यवसानं च तानीति द्वन्द्वः । प्रत्यवसानं भक्षणम् । गतिबुद्धिप्रत्यवसानानि अर्थो येषामिति विग्रहः ।

शब्दः कर्म येषां ते शब्दकर्माणः, तेषामिति बहुव्रीहिः। अविद्यमानं कर्म येषां ते अकर्मकाः। उभयत्रापि कर्मशब्दः कारकपरः । गतिबुद्धिप्रत्यवसानार्थश्च शब्दकर्माणश्च अकर्मकाश्च तेषामिति द्वन्द्वः। अणौ कर्ता अणिकर्ता । यच्छब्दोऽध्याहारार्थः। तदाह- गत्याद्यर्थानां शब्दकर्मणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात् । अर्थात् णौ अनुत्पन्ने सति शुद्धधातुवाच्यां क्रियां प्रति यः कर्ता सः ण्यन्तधातुवाच्यां प्रयोजकव्यापारात्मकां क्रियां प्रति कर्मसंज्ञकः स्यादित्यर्थः ।

**शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।**
**आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्।।**
**आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।**

अर्थः। अण्यन्तावस्था ।ण्यन्तावस्था। प्रयोज्य-कर्ता। कर्म ।

गत्यर्थकः <शत्रवः स्वर्गम् अगच्छन् । हरिः शत्रून् स्वर्गम् अगमयत् । शत्रवः, >शत्रून् ।

बुद्ध्यर्थकः स्वे वेदार्थम् अविदुः । हरिः स्वान् वेदार्थम् अवेदयत् । स्वे , स्वान्।

भक्षणार्थकः देवाः अमृतम् आश्नन् । हरिः देवान् अमृतम् आशयत् । देवाः , देवान्

अकर्मकः पृथ्वी सलिले आस्त । हरिः पृथ्वीं सलिले आसयत् । पृथ्वी, पृथ्वीम्।

शब्दार्थकः विधिः वेदम् अधैत। हरिः विधिं वेदम् अध्यापयत् । विधिः, विधिम्।

541- हृक्रोरन्यतरस्याम् – 1/4/53// हा च का च हृकरौ ,तयोरिति विग्रहः अणि कर्ता स णौ ,कर्म , कारके इति अनुवर्तनम् ।

हृक्रोरणौ यः कर्ता सः णौ वा कर्मसंज्ञः स्यात् । हारयति कारयति वा भृत्यं - भृत्येन वा कटम् ।

542- अधिशीङ्स्थाऽऽसां कर्म – 1/4/46// शीङ् ,स्था ,आस् एषां द्वन्द्वः। अधिपूर्वाः शीङ्स्थासः इति विग्रहे शाकपार्थिवादित्वादुत्तरपदलोपः । तदाह- अधिपूर्वाणामेषामाधारः कर्म स्यात् । अधिशेते वैकुण्ठं हरिः । अधितिष्ठति वैकुण्ठं हरिः । अध्यास्ते वैकुण्ठं हरिः ।

543- अभिनिविशश्च – 1/4/47// आधार इति कर्मेति चानुवर्तते । अभीनीति संघातग्रहणम् । अभिनीत्यतत् – सङ्घातपूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गम् ।

544- उपान्वध्याङ्वसः – 1/4/48// उप अनु अधि आङ् इत्येतेषां द्वन्द्वः । उपान्वध्याङ्पूर्वो वस् इति विग्रहे शाकपार्थिवादत्वात् समासः । उपादिपूर्वस्य वसतेराधारः कर्म स्यात् इति सूत्रार्थः । उपवसति ,अनुवसति अधिवसति , आवसति वा वैकुण्ठं हरिः । (वैकुण्ठे वसति) इत्यर्थः ।अभुक्त्यर्थस्य न –(वा. 1087) भोजननिवृत्तिवाचकस्य वसेराधारस्य कर्मत्वप्रतिषेध इत्यर्थः । वने उपवसति

**उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु ।**

**द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ।।( वा. 1444.)**

उभशब्दसर्वशब्दप्रकृतिकतसन्तयोः प्रयोगे सति द्वितीया कार्या इत्यर्थः । धिक्शब्दस्य प्रयोगे सति द्वितीया कार्या । द्विरुक्तस्य परमाम्रेडितम् , तदन्तेषु कृतद्विवचनेषु इति यावत् । तथा च कृतद्विवचनेषु उपपर्यादिषु त्रिषु प्रयुज्यमानेषु द्वितीया भवतीत्यर्थः । उभयतः कृष्णं गोपा । सर्वतः कृष्णम् । धिक् कृष्णाभक्तम्। । उपर्युपरि लोकं हरिः। अध्यधिः लोकम्। अधोधः लोकम्।

**अभितःपरितःसमयानिकषाहाप्रतियोगेपि –( वा. 1442)** "ततोन्यत्रापि दृश्यते" इत्यस्य प्रपञ्चोयम्। एषां प्रयोगेपि द्वितीया भवतीत्यर्थः । अभितः कृष्णम् । परितः कृष्णम् । ग्रामं समया । निकषा लङ्काम् । हा कृष्णाभक्तम् ।

**545- अन्तरान्तरेण युक्ते – 2/3/4//** अन्तरा इति आकारान्तमव्ययं न टावन्तम् । अन्तरेण अप्यव्ययं न तु तृतीयान्तम् इति भाष्ये स्थितम् । आभ्यां योगे द्वितीया। अन्तरा त्वां मां हरिः । अन्तरेण हरिं न सुखम् ।

**546- कर्मप्रवचनीयाः – 1/4/83//** इत्यधिकार सूत्रम्।

**547- अनुर्लक्षणे – 1/4/84//** लक्षणे द्योत्ये( हेत्वर्थे ) अनुरुक्तसंज्ञः स्यात् ।

**548- कर्मप्रवचनीययुक्ते द्वितीया – 2/3/8//** एतेन योगे द्वितीया स्यात् इति सूत्रार्थः स्पष्टः । पर्यन्यो जपमनु प्रावर्षत्। हेतुभूतजपो अत्र लक्षणम्।

**549- तृतीयार्थे – 1/4/85//** अस्मिन्द्योत्येऽनुरुक्तसंज्ञः स्यात् । नदीमनुवसिता सेना नद्या सह सम्बन्धेत्यर्थः ।

**550-हीने 1/4/86//** हीने द्योत्ये अनुः प्राग्वत्। निकर्षे द्योत्ये इत्यर्थः । अनु हरिं सुराः। सुराः हरेः हीनाः इत्यर्थः।

**551-उपोऽधिके च – 1/4/87//** अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात् उपहरिं सुराः ।

**552- लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः – 1/4/90//** लक्षणं – ज्ञापकम्। अयं प्रकारः इत्थं , तं प्राप्तः इत्थंभूतः , तस्याख्यानमुपपादकमित्थंभूताख्यानम्। भागः स्वीकार्यांशः तत्स्वामी विवक्षितः। व्याप्तुं कात्स्न्र्येन सम्बन्धुमिच्छा वीप्सा। लक्षणं च इत्थंभूताख्यानं च भागश्च वीप्सा चेति द्वन्द्वाद्विषयसप्तमी। तदाह- एष्वर्थे विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः। लक्षणे – वृक्षं प्रति , परि, अनु वा विद्योतते विद्युत्। वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थः । इत्थम्भूताख्याने – भक्तोविष्णुं प्रति, परि, अनु वा। भागे- लक्ष्मीर्हरिं प्रति, परि, अनु वा। हरेः भाग इत्यर्थः वीप्सायाम् – वृक्षं प्रति, परि, अनु वा सिञ्चति।

**553- अभिरभागे -1/4/91//** भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात्। हरिमभि वर्तते।

**554- अधिपरी अनर्थकौ – 1/4/93//** उक्तसंज्ञौ स्तः । कुतोऽध्यागच्छति । कुतः पर्यागच्छति ।

**555- सुः पूजायाम् –1/4/94//** कर्मप्रवचनीय इति शेषः । सुसिक्तम् ।

**556- अतिरतिक्रमणे च – 1/4/95//** अतिक्रमणे पूजायां च अतिः कर्मप्रवचनीयसंज्ञः स्यात् । अति देवान् कृष्णः ।

**557- अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु -1/4/96//** एषु द्योत्येष्वपिरुक्त- संज्ञः स्यात् । सर्पिषोऽपि स्यात् ।

**558- कालाध्वनोरत्यन्तसंयोगे – 2/3/5//** निरन्तरसंयोगः- अत्यन्तसंयोगः। अन्त विच्छेदः तमतिक्रान्तः अत्यन्तः स चासौ संयोगश्चेति विग्रहः । गुणक्रियाद्रव्यैः कालाध्वनोरविच्छिन्नसंयोगे गम्ये द्वितीया स्यात् इत्यर्थः । गुणात्यन्तसंयोगे

उदाहरणम्- मासं कल्याणी । मासाविच्छिन्नमङ्गलवान् इत्यर्थः क्रियात्यन्तसंयोगे – मासमधीते । त्रिंशदिनात्मके( मासे) प्रतिदिनमुचितकाले -

निरन्तरमधीत इत्यर्थः । द्रव्यात्यन्तसंयोगे- मासं गुडधानाः । मासे प्रतिदिनं निरन्तरं गुडधानाः सन्तीत्यर्थः । अध्वात्यन्तसंयोगे उदाहरणम् – क्रोशं कुटिला नदी। मासस्य द्विरधीते । मासे प्रतिदिनमेकवारमित्येवं द्विरधीत इत्यर्थः । अत्र अत्यन्तसंयोगाभावात् कृत्वोर्थप्रयोगे कालेधिकरणे षष्ठी इति ।

**559- स्वतन्त्रः कर्ता – 1/4/54//** क्रियायां स्वातन्त्र्येण विवक्षितोर्थः कर्ता स्यात्। स्वातन्त्र्यमिह क्रियाजनने प्राधान्यम् , अर्थात् धात्वर्थव्यापाराश्रयत्वम्।

**560-साधकतमं करणम् – 1/4/42//** क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। कर्ता क्रियायां जनयितव्यायां यत् सहायभूतं तदुपकारकमित्युच्यते। अतिशयितं साधकं साधकतमिति। यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत् प्रकृष्टम्। कर्तृव्यापाराधीनयद्व्यापाराव्यवहिता क्रियानिष्पत्तिः तत्स्यां करणमिति।

**561- कर्तृकरणयोस्तृतीया – 2/3/18//**'अनभिहिते ' इत्यधिकारादाह- अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली। रामकर्तृकबाणकरणकहिंसाक्रियाविषयो वालीत्यर्थः।

**'प्रकृत्यादिभ्य उपसंख्यानम्'- (वा. 1466.)** प्रकृत्यादिगणपठितेभ्यः शब्देभ्यः तृतीया स्यात्। उपपदविभक्तिरियम्। प्रकृत्या चारुः। प्रकृतिः स्वभावः तत्सम्बन्धिचारुत्ववानित्यर्थः । प्रायेण याज्ञिकः । समेन एति। विषमेण एति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन वा याति इत्यादिः ।

**562- दिवः कर्म च – 1/4/43//** दिवः साधकतमं कारकं कर्मसंज्ञं स्यात् च कारात् करणसंज्ञम्। अक्षैः अक्षान् वा दीव्यति।

**563- अपवर्गे तृतीया – 2/3/6//** अपवर्गः समाप्तिः , इह तु फलप्राप्तिर्विवक्षिता फलप्राप्तिपर्यन्तत्वात् क्रियायाः। तदाह- अपवर्गः फलप्राप्तिः , तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। अह्ना क्रोशेन वा अनुवाकोऽधीतः । अह्नि क्रोशे वा निरन्तरम् अनुवाकोऽध्ययनेन गृहीत इत्यर्थः ।

**564- सहयुक्तेऽप्रधाने – 2/3/19//** सूत्रे युक्तग्रहणं सहार्थकशब्दानां साकमित्यादीनामपि ग्रहणार्थमित्याह- सहार्थेन युक्ते अप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता। एवं साकंसार्धंसमंयोगेपि । विनापि तद्योगं तृतीया, अर्थात् 'वृद्धो यूना तल्लक्षणश्चेत्' इति सूत्रे सहादिशब्दाभावेपि तदर्थावगमेपि तृतीयानिर्देशदर्शनात् पुत्रेणागतः पिता अत्रापि तृतीया सिद्धा।

**565- येनाङ्गविकारः – 2/3/20//** अङ्गानि अस्य सन्तीति अङ्गं , शरीरम्। तस्य विकारः इति विग्रहः। येनेत्यनेन प्रकृत्यर्थभूतमङ्गं परामृश्यते । नहि अविकृतेन अङ्गेन अङ्गिनो विकारः सम्भवति। तदाह- येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततः तृतीया स्यात् । अक्ष्णा काणः । अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः अक्षिविकारप्रयुक्तकाणत्वावानिति।

**566-इत्थंभूतलक्षणे – 2/3/21//** अयं प्रकारः इत्थं , तं भूतः प्राप्तः इत्थंभूतः। लक्षणं ज्ञापकम्। प्रकारविशेषं प्राप्तस्य ज्ञापके सम्बन्धे द्योत्ये इत्यर्थः । तदाह- कञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात् । जटाभिः तापसः । जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः।

**567- संज्ञोन्यतरस्यां कर्मणि – 2/3/22//** सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा सञ्जानीते । द्वितीयापवादोयं तृतीया विकल्पः ।

**658- हेतौ – 2/3/23//** हेत्वर्थे तृतीया स्यात् । हेतुरिह कारणपर्यायः लौकिक एव विवक्षितः, न तु तत्प्रयोजको हेतुश्च इति कृत्रिमः । द्रव्यादिसाधारण

निर्व्यापारसाधारणं च हेतुत्वम्। अर्थात् द्रव्यगुणक्रियात्मककार्यत्रय- निरूपितं निर्व्यापारसव्यापारवृत्ति च यत् तद्हेतुत्वम् इति । करणं तु क्रियामात्रविषयं व्यापारनियतं च । क्रियाजनकमात्रवृत्ति व्यापारवृत्ति च यत् तदेव करणत्वमिति । एवं हेतुकरणयोः भेदः । दण्डेन घटः । दण्डहेतुको घटः इत्यर्थः । दण्डे व्यापारसत्वेपि क्रियाजनकत्वाभावात् न करणत्वम्। पुण्येन दृष्टो हरिःपुण्यस्य हरिदर्शनजनकत्वेपि निर्व्यापारत्वात् न् करणम्।

**'अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया'–( वा. 5040.)** वैदिकमार्गानुयायिनः शिष्टाः , वेदमार्गात् अपेताः अशिष्टाः , तेषां व्यवहारः आचारः तस्मिन् विषये दाण्धातोः प्रयोगे सति चतुर्थ्यर्थे सम्प्रदाने तृतीया वाच्या इत्यर्थः । दास्या संयच्छते कामुकः । दास्यां रतिः धर्मशास्त्रनिषिद्धत्वादशिष्टव्यवहारः इति भावः । धर्मे तु भार्यायै संयच्छति।

**569- कर्मणा यमभिप्रैति स सम्प्रदानम् – 1/4/32//** कर्मणा , यम् , अभिप्रैति , सः सम्प्रदानम् । संज्ञासूत्रम्। दानस्यकर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्। अर्थात् कर्मसंज्ञकेन गवादिद्रव्येण यमभिप्रैति शेषित्वेनाध्यवस्यति स सम्प्रदानमित्यर्थः। सम्प्रदीयते यस्मै तत् सम्प्रदानम् इति अन्वर्थसंज्ञा।

**570- चतुर्थी सम्प्रदाने – 2/3/13//** विप्राय गां ददाति। विप्रमुद्दिश्य गां ददातीत्यर्थः ।

**'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्'-( वा. 1085.)** क्रियोद्देश्यमपि सम्प्रदानं भवतीत्यर्थः । पत्ये शेते। पतिमुद्दिश्य शेते इत्यर्थः ।

**571- रुच्यर्थानां प्रीयमाणः- 1/4/33//** अत्र पदद्वयम् । सम्प्रदानम् , कारके इति अनुवर्तनात् रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोर्थः सम्प्रदानं स्यात् । हरये रोचते

भक्तिः । अन्यकर्तृकोभिलाषः रुचिः । अत्र भक्तिः हरेः प्रसन्नतां रुचिं वा उत्पादयति। अतः भक्त्या प्रीयमाणः हरिः सम्प्रदानत्वात् हरये इति चतुर्थी।

**572- श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः- 1/4/34//** श्लाघृ – कत्थने ,ह्नुङ् – अपनयने ष्ठा गतिनिवृत्तौ ,शप- उपालम्भे, एषां द्वन्द्वः । एषां धातूनां प्रयोगे वोधयितुमिष्टः सम्प्रदानं स्यात् । गोपी स्मरात् कृष्णाय श्लाघते , ह्नुते ,तिष्ठते , शपते वा । मन्मथपीडावशात् गोपी आत्मस्तुत्या विरहवेदनां कृष्णं वोधयति इत्यर्थः।

**573- धारेरुत्तमर्णः – 1/4/35//** धारेरित्यनन्तरं प्रयोगे इत्यध्याहार्यम् । तदाह - धारयतेः प्रयोगे उत्तमर्णः उक्तसंज्ञः स्यात् । तत्र ऋणस्य ग्रहीता अधमर्णः ऋणस्यार्पयिता धनस्वामी उत्तमर्णः । भक्ताय धारयति मोक्षं हरिः ।

**574- स्पृहेरीप्सितः – 1/4/36//** स्पृहेः , ईप्सितः इति पदद्वयम् । प्रयोगे इत्यध्याहार्यम्। तदाह – स्पृहयतेः प्रयोगे इष्टः सम्पदानं स्यात्। पुष्पेभ्यः स्पृहयति ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् कर्मसंज्ञा । पुष्पाणि स्पृहयति।

**575- क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः – 1/4/37//** क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात् । हरये क्रुध्यति , द्रुह्यति , ईर्ष्यति , असूयति वा । रावणादिः इति शेषः । हरिविषयकं कोपं करोतीत्यर्थः । क्रोधोऽमर्षः । द्रोहोऽपकारः । ईर्ष्या असहनम् । असूया गुणेषु दोषारोपः ।

**576- क्रुधद्रुहोरुपसृष्टयोः कर्म – 1/4/38//** सोपसर्गयोरनयोर्योगे यं प्रति कोपः तत्कारकं कर्मसंज्ञं स्यात्। क्रूरमभिक्रुध्यति , अभिद्रुह्यति वा । पूर्वसूत्रापवादोऽयम्।

**577- राधीक्ष्योर्यस्य विप्रश्नः – 1/4/39//** राध् संसिद्धौ , ईक्ष दर्शने एतयोः कारक सम्प्रदानं स्यात् । कृष्णाय राध्यति , ईक्षते वा ।किं कृष्णस्य शुभमशुभं वा इति

पृष्टो गर्गः कृष्णविषयकं शुभाशुभं पर्यालोचयतीत्यर्थः । **578-**

**प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता – 1/4/40//** परस्य इत्यध्याहार्यम् । श्रुवः इत्यस्य विशेषणम् । श्रु श्रवणे इह तु प्रेरणापूर्वकाभ्युपगमे वर्तते । पूर्वशब्दः प्रेरणात्मकं व्यापारं परामृशति । तदाह- आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनारूपस्य व्यापारस्य कर्ता सम्प्रदानं स्यात् । विप्राय गां प्रतिशृणोति , आशृणोति वा । विप्रेण मह्यं देहीति प्रवर्तितस्तत्प्रतिजानीते इत्यर्थः । अर्थात् मह्यं गवादिद्रव्यं देहीति विप्रेण पृष्टः सन् देवदत्तः तुभ्यं ददामीत्यभ्युपगच्छतीति योजना।

**579- अनुप्रतिगृणश्च – 1/4/41//** अनुप्रति , गृणः , च इति पदत्रयम् । पूर्वस्य कर्ता सम्प्दानम् , कारके चानुवर्तते । तदाह – आभ्यां गृणातेः कारकं पूर्वव्यापारस्यकर्तृभूतमुक्तसंज्ञं स्यात् । होत्रे अनुगृणाति , प्रतिगृणाति वा । होता प्रथमं शंसति , तमध्वर्युः प्रोत्साहयतीत्यर्थः ।

**580- परिक्रयणे सम्प्रदानमन्यतरस्याम् – 1/4/44//** साधकतमम् , कारके इति अनुवर्तते तुभ्यम् एतावद्वेतनं दीयते, तत् गृह्णन् एतावन्तं कालं त्वं मम कर्मकरो भव इत्येवं परिमितकालं भृत्या स्वीकरणं परिक्रयणम् इत्यर्थः । तदाह- तस्मिन्साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्। शतेन शताय वा परिक्रीतः ।

**'तादर्थ्ये चतुर्थी वाच्या'-(वा. 1448.)**तस्मै इदं तदर्थम्। नित्यसमासः । तदर्थस्य भावः तादर्थ्यम्। तेन च उपकार्योपकारकभावसम्बन्धो विवक्षितः । तत्र उपकार्यादेव चतुर्थी। मुक्तये हरिं भजति । यूपाय दारु, कुण्डलाय हिरण्यम्। मुक्त्यर्थमित्यर्थः ।

**'क्लृपि सम्पद्यमाने च'–(वा. 1459.)** क्लृपिधातौ प्रयुज्यमाने सति सम्पद्यमानेर्थे वर्तमानात् चतुर्थी वाच्या इत्यर्थः । भक्तिर्ज्ञानाय कल्पते ,सम्पद्यते जायते इत्यादि।

**'उत्पातेन ज्ञापिते च'–( वा. 1460.)** अशुभसूचकः आकस्मिकः भूतविकारः उत्पातः, तेन सूचितेऽर्थे विद्यमानात् चतुर्थी वाच्या इत्यर्थः । वाताय कपिला विद्युत् । महावातस्य सूचिका इत्यर्थः ।

**हितयोगे च- (वा. 1461.)** चतुर्थी वाच्या इत्यर्थः । ब्राह्मणाय हितम्। ब्राह्मणस्य सुखकृदित्यर्थः ।

**581- क्रियार्थोपपदस्य च कर्मणि स्थानिनः – 2/3/14//** क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था । क्रियेति विशेष्यमध्याहार्यम् । क्रियार्था क्रिया उपपदं यस्येति विग्रहः तुमुनो विशेषणमेतत् । उपोच्चरितं पदं उपपदम्। स्थानिन इत्यपि तद्विशेषणम्। स्थानं प्रसक्तिरस्यास्तीति स्थानी , तस्येति विग्रहः । तादृशस्य तुमुन्नन्तस्य कर्मणि चतुर्थीति फलितम्। तदाह- क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् । फलेभ्यो याति । फलानि आहर्तुं यातीत्यर्थः । तुमुन् प्रत्ययान्ताहरणक्रियां प्रति फलानां कर्मत्वात् चतुर्थी । नमस्कुर्मो नृसिंहाय । नृसिंहमुकूलयितुमित्यर्थः ।

**582- तुमर्थाच्च भाववचनात् – 2/3/15//** भाववचनाच्च इति सूत्रेण यो विहितस्तदन्तात् चतुर्थी स्यात्। यागाय याति । यष्टुं यातीत्यर्थः ।

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च – 2/3/16// युज्यते इति योगः , नमस् इत्यादिभिर्युक्तात् इत्यर्थः । फलितमाह- एभिर्योगे चतुर्थी स्यात् । हरये नमः । प्रजाभ्यः स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा। दैत्येभ्यः हरिरलं । इन्द्राय वषट् ।

584- मन्यकर्मण्यनादरे विभाषाऽप्राणिषु – 2/3/17// चतुर्थी, अनभिहिते इति चानुवर्तते। तदाह – प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे । न त्वां तृणं मन्ये,

तृणाय वा । हे देवदत्त त्वां तृणत्वेनापि न मन्ये इत्यर्थः । तृणादपि अधमत्वप्रतीतेः तिरस्कारातिशयः फलितः ।

**'नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्** '। (वा. 1464 .) न त्वां नावम् अन्नं वा मन्ये , इत्यत्र अप्राणित्वेपि चतुर्थी न । तथा न त्वां काकं मन्ये, न त्वां शुकं मन्ये, न त्वां शृगालं मन्ये इत्यप्युदाहार्यम् ।

**585- गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि – 2/3/12//** अनभिहिते इति सूत्राधिकारात् सूत्रार्थः भवति- अध्वभिन्ने गत्यर्थानां कर्मण्येते स्तः चेष्टायाम् । ग्रामं ग्रामाय वा गच्छति ।

## इति चतुर्थीविभक्तिः ।

## UNIT- IV.

### अथ पञ्चमीविभक्तिः ।

**586- ध्रुवमपायेऽपादानम् – 1/4/24//** अपायः – विश्लेषः वियोगः इत्यर्थः । ध्रुवम् अवधिभूतं स्थिरमित्यर्थः । तदाह- अपायो विश्लेषः तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात् । अतः वाक्यपदीये उक्तम् ।

**"अपाये यदुदासीनं चलं वा यदि वाचलम् ।**
**ध्रुवमेवातदावेशात् तदपादानमुच्यते"।।**

**587- अपादाने पञ्चमी – 2/3/28//** अनभिहिते अपादानकारके पञ्चमी विभक्ति स्यात्। ग्रामात् आयाति । धावतः अश्वात् पतति ।

**"जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्"–(वा. 1079.)** जुगुप्साद्यर्थकधातुभिर्यो जुगुप्सादिविषयस्य अपादानत्वम् इत्यर्थः । पापात् जुगुप्सते । पापविषये न प्रवर्त्त इत्यर्थः । पापात् विरमति । धर्मात् प्रमाद्यति ।

**588- भीत्रार्थानां भयहेतुः – 1/4/25//** अपादानम् , कारके इति चानुवर्तते । तदाह भयार्थानां त्राणार्थानां च प्रयोगे हेतुरपादानं स्यात् । चोरात् बिभेति । चोरात् त्रायते चोरेण हेतुना इत्यर्थः ।

**589- पराजेरसोढः – 1/4/26//** पराजेः प्रयोगे असह्योर्थोपादानं स्यात् । अध्ययनात् पराजयते । सोढुमशक्यः इत्यर्थः । हेतुतृतीयापवादोऽयम् ।

**590- वारणार्थानामीप्सितः – 1/4/27//** प्रवृत्तिविघातो वारणम् । वारणार्थानां धातूनां प्रयोगे ईप्सितोर्थः अपादानं स्यात् । यवेभ्यो गां वारयति । यवेषु प्रवर्तितुकामां गां प्रवृत्तिविमुखीकरोति इत्यर्थः ।

**591- अन्तर्धौ येनादर्शनमिच्छति – 1/4/28//** व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तद् अपादानं स्यात् । मातुर्निलीयते कृष्णः । कृष्णः मातृकर्तृकस्वविषयकदर्शनविरहाय कुड्यादिना प्रच्छन्नो भवतीत्यर्थः ।

**592- आख्यातोपयोगे – 1/429//** नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात् । उपाध्यायात् अधीते । नियमविशेषपूर्वकम् उपाध्यायस्योच्चारणम् अनूचारयति इत्यर्थः ।

**593- जनिकर्तुः प्रकृतिः – 1/4/30//** जायमानस्य हेतुरपादानं स्यात् । व्रह्मणः प्रजाः प्रजायन्ते । अत्र - घटादिषु कुलालादिवत् व्रह्मणः प्रजोत्पत्तौ निमित्तकारणत्वमिति भावः ।

**594- भुवः प्रभवः – 1/4/31//** भवनं भूः । भूकर्तुः प्रभवस्तथा । प्रभवति प्रथमं प्रकाशते अस्मिन्निति प्रभवः , प्रथमप्रकाशस्थानमित्यर्थः । हिमवतो गङ्गा प्रभवति

**'ल्यब्लोपे कर्मण्यधिकरणे च'–( वा. 1474.)** ल्यवन्तस्य लोपे अदर्शने अप्रयोगे सति गम्यमानतदर्थं प्रति कर्मणि अधिकरणे च पञ्चमी वाच्या इत्यर्थः । प्रासादात् प्रेक्षते आसनात् प्रेक्षते । प्रासादमारुह्य , आसने उपविश्य प्रेक्षते इत्यर्थः । श्वशुरात् जिह्रेति। श्वशुरं वीक्ष्य इत्यर्थः ।

**595- अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते- 2/3/39//** एतैर्योगे पञ्चमी स्यात् । अर्थात् - अन्य, आरात्, इतर, ऋते , दिक्शब्द ,अञ्चूत्तरपद, आच् , आहि एतैरष्टभिर्योगे सतीत्यर्थः ।

अन्यो भिन्न इतरो वा कृष्णात् ।। आराद्वनात् । ऋते कृष्णात् । पूर्वो ग्रामात् । प्राक्- प्रत्यग्वा ग्रामात् । आच्- दक्षिणा ग्रामात् । आहि- दक्षिणाहि ग्रामात् ।

**596- अपपरी वर्जने – 1/4/88//** एतौ वर्जने कर्मप्रवचनीयौ स्तः । कर्मप्रवचनीयाः इत्यधिकृतस्य द्विवचनेन विपरिणामः इति भावः ।

**597- आङ् मर्यादावचने – 1/4/89//** आङ् मर्यादायाम उक्तसंज्ञः स्यात् । मर्यादाभिविध्योराङ् कर्मप्रवचनीयसंज्ञकः स्यादित्यर्थः ।

**598- पञ्चम्यपाङ्परिभिः – 2/3/10//** एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात् । अप हरेः , परि हरेः संसारः । परिरत्र वर्जने । आ मुक्तेः संसारः । आ सकलात् ब्रह्म।

**599- प्रतिः प्रतिनिधिप्रतिदानयोः – 1/4/92//** सदृशः प्रतिनिधिः , दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । तदाह- एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात् । कर्मप्रवचनीयसंज्ञकः इत्यर्थः।

**600- प्रतिनिधिप्रतिदाने च यस्मात् -2/3/11//**. अत्र कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। यत्सम्बन्धिनी प्रतिनिधिप्रतिदाने तस्मात् कर्मप्रवचनीययुक्तात् पञ्चमीत्यर्थः फलति। प्रद्युम्नः कृष्णात् प्रति। युद्धादौ प्रद्युम्नः कृष्णनिरूपितसादृश्यवान् इत्यर्थः पञ्चम्यर्थः सादृश्यम्। प्रतिस्तु तद्द्योतकः । तिलेभ्यः प्रति-यच्छति माषान्। ऋणत्वेन ग्रहीतान् तिलान् स्वरूपेण मूल्याद्यात्मना वा प्रत्यर्पयतीत्यर्थः ।

**601- अकर्तयृणे पञ्चमी -2/3/24//** कर्तृवर्जितं यदृणं ततः पञ्चमी स्यात् । शतात् वद्धः । अकर्तरि किम् शतेन बन्धितः ।

**602- विभाषा गुणेऽस्त्रियाम् – 2/3/25//** हेतौ , पञ्चमी इति चानुवर्तते । तदाह- गुणे हेतौ अस्त्रीलिङ्गे पञ्चमी वा स्यात् । जाड्यात् – जाड्येन वा बद्धः । अस्त्रियाम् इति योजनात् बुद्ध्यामुक्तः इत्यत्र पञ्चमी न भवति ।

**603- पृथग्विनानानाभिस्तृतीऽयान्यतरस्याम् – 2/3/32//** मण्डूकप्लुत्या पञ्चमीद्वितीये चानुवर्तेते । तदाह- एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च । पृथक् रामेण- रामात् –रामं वा । एवं विना , नाना ।

**604- करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य – 2/3/33//** एभ्योद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः । स्तोक , अल्प , कृच्छ्र कतिपय एभ्यश्चतुर्भ्यः इत्यर्थः । स्तोकेन स्तोकात् वा मुक्तः । लघुना आयासेन मुक्त इत्यर्थः। आयासो न द्रव्यमिति भावः । द्रव्ये वृत्तौ स्तोकेन विषेण हतः । एवम् – अल्पेन अल्पात् वा मुक्तः । कृच्छ्रेण कृच्छ्रात् वा मुक्तः । कष्टेन इत्यर्थः ।

**605- दूरान्तिकार्थेभ्यो द्वितीया च – 2/3/35//** एभ्यो द्वितीया स्यात् चात् पञ्चमीतृतीये च । दूरार्थकेभ्यः अन्तिकार्थकेभ्यश्च इत्यर्थः । ग्रामस्य दूरम् – दूरात् – दूरेण वा , अन्तिकम् – अन्तिकेन – अन्तिकात् वा ।

## अथ षष्ठी विभक्तिः ।

**606- षष्ठी शेषे** – 2/3/50// उक्तादन्यः शेषः । कर्मणि द्वितीया इत्यादिसूत्रेषु द्वितीयादिविधिषु हि कर्मकर्तृ – करणसम्प्रदानापादानाधिकरणकारकाण्यनुक्रान्तानि। प्रथमाविधौ प्रातिपदिकार्थोनुक्रान्तः । एतेभ्यः अन्यः स्वस्वामिभावादिसम्बन्धः शेषपदार्थः । तदाह- कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः -

शेषः । तत्र षष्ठी स्यात् । राज्ञः पुरुषः । स्वस्वामिभावरूपविशेषात्मना सम्बन्धत्वरूपसामान्यात्मना च सम्बन्धः षष्ठ्यर्थः। राजाश्रितस्वामित्वनिरूपितस्वत्वात्मकसम्बन्धाश्रयः पुरुषः इति बोधः ।

607- षष्ठी हेतुप्रयोगे – 2/3/26// हेतौ इति अनुवर्तते । तदाह- हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । हेतुवाचकात् षष्ठीति फलितम् । हेतौ इति तृतीयां बाधित्वा षष्ठी । अन्नस्य हेतोर्वसति ।

608- सर्वनाम्नस्तृतीया च – 2/3/27/// सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च । केन हेतुना वसति । कस्य हेतोः वसति ।

'निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्'–( वा. 1473.) निमितपर्यायाणां प्रयोगे तेभ्यस्तत्समानाधि- करणेभ्यश्च सर्वासां विभक्तीनां प्रायेण प्रयोगो भवतीत्यर्थः । किं निमित्तं वसति , केन निमित्तेन , कस्मै निमित्ताय , कस्मात् निमितात् , कस्य निमित्तस्य , कस्मिन् निमित्ते । प्रायग्रहणात् असर्वनाम्नः प्रथमाद्वितीये न स्तः । ज्ञानेन निमितेन हरिः सेव्यः । ज्ञानाय निमित्ताय इत्यादि ।

609- षष्ठ्यतसर्थप्रत्ययेन – 2/3/30//"दक्षिणोत्तराभ्यामतसुच्" इति विहितः यः अतसुच्प्रत्ययः तस्यार्थः दिग्देशकालरूपः स एवार्थो यस्य सः अतसर्थप्रत्ययः प्रयोगे इत्यर्थः । तदाह – एतद्योगे षष्ठी स्यात् । ग्रामस्य दक्षिणतः , पुरः पुरस्तात् , उपरि , उपरिष्टात् ।

610-एनपा द्वितीया – '2/3/31// एनबन्तेन योगे द्वितीया स्यात् । एनपा इति योगविभागात्षष्ठ्यपि ।दक्षिणेन ग्रामं – ग्रामस्य वा । एवम् उत्तरेण ।

**611- दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्** – 2/3/34// एतैर्योगे षष्ठी स्यात्पञ्चमी । दूरार्थकैः अन्तिकार्थैश्च शब्दैर्योगे इत्यर्थः । दूरं निकटं ग्रामस्य – ग्रामाद्वा ।

**612- ज्ञोविदर्थस्य करणे** – 2/3/51// ज्ञः अविदर्थस्यैति पच्छेदः । ज्ञ इति ज्ञाधातोरनुकरणात् षष्ठ्येकवचनम् । विद् ज्ञानम् अर्थः यस्य विदर्थः , स न भवतीति अविदर्थः । ज्ञानार्थकभिन्नस्येति तदाह- जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षेते षष्ठी स्यात् । सर्पिषो ज्ञानम्।

**613- अधीगर्थदयेशां कर्मणि** – 2/3/52// इक् स्मरणे नित्यमधिपूर्वः , तस्यार्थः इवार्थो यस्य सः अधीगर्थः । स्मरणार्थक इति यावत् । षष्ठी शेषे इत्यतः शेषे इति अनुवृत्तिः । तदाह- एषां कर्मणि शेषे षष्ठी स्यात् । मातुः स्मरणम् । सर्पिषो दयनम् , ईशनं वा । वस्तुतः कर्मीभूतमातृसम्बन्धीस्मरणम् इत्यर्थः ।

**614- कृञः प्रतियत्ने** – 2/3/53// कर्मणीति , शेष इति चानुवर्तते । प्रतियत्नो गुणाधानम् । तदाह- कृञः कर्मणि शेषे षष्ठी स्यात् गुणाधाने । एधो दकस्योपस्करणम्। वस्तुतः कर्मीभूतैधोदकसम्बन्धि परिस्करणम्।

**615- रुजार्थानां भाववचनानामज्वरेः**- 2/3/54// रुजा पीडा रोग इत्यर्थो येषामिति विग्रहः । भावः धात्वर्थः वचनः कर्ता येषामिति विग्रहः । भावकर्तृकाणामिति फलितम् । शेष इति कर्मणीति चानुवर्तते । तदाह- भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् । चोरस्य रोगस्य रुजा । कर्मीभूतचौरगता सन्तापादिपीडा इत्यर्थः । अत्र भावघञन्तेन रोगशब्देन शारीरक्षयादिविकारविशेषो विवक्षितः । स च रुजायां कर्ता । तत्कर्मणश्चौरस्य शेषत्वविवक्षायां षष्ठी ।

**आशिषि नाथः** – 2/3/55// शेषे कर्मणि इति चानुवर्तते । तदाह- आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात् । सर्पिषो नाथनम्।

617- जासिनिप्रहणनाटक्राथपिषां हिंसायाम् – 2/3/56// कर्मणि शेषे इत्यनुवर्तते । तदाह- हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात् । चौरस्य निप्रहणनम् – प्रणिहननम्, निहननम् – प्रहणनम् वा।

**618- व्यवहृपणोः समर्थयोः – 2/3/57//** शेषे कर्मणि षष्ठी स्यात् । द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता । शतस्य व्यवहरणं पणनं वा ।

619- दिवस्तदर्थस्य -2/3/58// पूर्वसूत्रे निर्दिष्टव्यवहृपणौ तच्छब्देन परामृश्येते । तयोः व्यवहृपणोः अर्थ एवार्थो यस्येति विग्रहः । तदाह- द्यूतार्थस्य क्रयविक्रय-रूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात् । शतस्य दीव्यति ।

**620- विभाषोपसर्गे – 2/3/59//** उपसर्गे सति व्यवहृपणार्थस्य दिवः कर्मणि षष्ठी वा स्यात् । पूर्वयोगापवादः । शतस्य शतं वा प्रतिदीव्यति ।

**621- प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने – 2/3/61//** देवता सम्प्रदानं यस्य तस्मिन्नित्यर्थः। देवतासम्प्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणोर्हविषो वाचकाच्छब्दात् षष्ठी स्यात् । अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनुब्रूहि वा ।

**622- कृत्वोऽर्थप्रयोगे कालेऽधिकरणे – 2/3/64//** कृत्वसुच्प्रत्ययस्यार्थ एवार्थः येषां ते कृत्वोर्थाः तेषां प्रयोगः इत्यर्थः। शेषे षष्ठीति चानुवर्तते । तदाह- कृत्वोर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात् । पञ्चकृत्वोऽह्नो भोजनम् । द्विरह्नो भोजनम्।

**623- कर्तृकर्मणोः कृति- 2/3/65//** कृत्प्रत्यये प्रयुज्यमाने सतीत्यर्थः । फलितमाह - कृद्योगे कर्तरि कर्मण च षष्ठी स्यात् । कृष्णस्य कृतिः । जगतः कर्ता कृष्णः । कृ धातोः भावे स्त्रियां क्तिन् । कृष्णकर्तृका सृष्टिः इत्यर्थः ।

जगत् कर्मकसृष्ट्यनुकूलव्यापारवान् इत्यर्थः । कृति किम्? तद्धिते मा भूत् । कृतपूर्वी कटम् ।

**624- उभयप्राप्तौ कर्मणि – 2/3/66//** पूर्वसूत्रात् कृतीत्यनुवर्तते । उभयप्राप्तौ इति बहुव्रीहिः । तदाह- उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी स्यात् । अर्थात् एकस्मिन् कृति उभयोः कर्तृकर्मणोः षष्ठीप्रसक्तौ कर्मण्येव षष्ठी स्यात् न तु कर्तरि आश्चर्यो गवां दोहोऽगोपेन । अगोपकर्तृकः गोकर्मकः यो दोहः स अद्भुत इत्यर्थः ।

**'शेषे विभाषा'–(वा. 1514.)** अकाकारप्रत्ययव्यतिरिक्तप्रत्ययप्रयोगे उभयप्राप्तौ इति नियमो विकल्प्यते । विचित्रा जगतः कृतिर्हरेः – हरिणा वा ।

**625- क्तस्य च वर्तमाने – 2/3/67//** वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात् । न लोकाव्यय--- इति निषेधस्यापवादः । राज्ञां मतो बुद्धो पूजितो वा । मनुधातोः बुधधातोः पूजधातोश्च मतिबुद्धिपूजार्थेभ्यश्च इति वर्तमाने क्त प्रत्ययः ।

626- अधिकरणवाचिनश्च – 2/3/68// क्तस्य योगे षष्ठी स्यात् । इदमेषामासितं शयितं गतं भुक्तं वा । आस्यते अस्मिन् आसितम् । शेते अस्मिन् शयितम् । अधिकरणे क्त प्रत्ययः ।

627- न लोकाव्ययनिष्ठाखलर्थतृनाम् – 2/3/69// एषां प्रयोगे षष्ठी न स्यात् । न, उ ,उक अव्यय , निष्ठा , खलर्थ ,तृन् एषामित्यर्थः । ल इति लडादीनां सामान्येन ग्रहणम्। तेषां च साक्षात्प्रयोगाभावात् तदादेशग्रहणमिति भावः । लादेश- कुर्वन् कुर्वाणो वा सृष्टिं हरिः । लटः शतृशानचौ इह कर्मणि -षष्ठीनिषेधात् द्वितीया ।उ- हरिं दिदृक्षुः अलङ्करिष्णुर्वा । उक- दैत्यान् घातुको हरिः । अव्ययम्- जगत्सृष्ट्वा , सुखं कर्तुम् । निष्ठा- विष्णुना हता दैत्याः । दैत्यान्हतवान्विष्णुः । क्तक्तवतु निष्ठा। खलर्थाः- ईषत्करः प्रपञ्चो हरिणा । तृन् इति प्रत्याहारः - शतृशानचौ इति

तृशब्दादारभ्य आ तृनो नकारात्। शानच्- सोमं पवमानः। चानश्- आत्मानं मण्डयमानः । शतृ- वेदमधीयन् । तृन्- कर्ता लोकान् ।

**628- अकेनोर्भविष्यदाधमर्ण्ययोः 2/3/70//** नेत्यनुवर्तते । अकश्च इन् च तयोरिति विग्रहः । भविष्यच्च आधमर्ण्यं च तयोरिति द्वन्द्वः । यथासंख्यं नेष्यते, भाष्यात्। तदाह- भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात् । व्रजं गामी । शतं दायी । सतः पालकोऽवतरति ।

**629- कृत्यानां कर्तरि वा – 2/3/71//** षष्ठी वा स्यात् । अर्थात् कृत्या इत्यधिकृत्य विहिताः कतिपयकृत्यप्रत्यय- विशेषाः , तद्योगे कर्तरि षष्ठी वा स्यादित्यर्थः । मया - मम वा सेव्यो हरिः । षेवृ सेवायाम् , ऋहलोर्ण्यत् इति कर्मणि ण्यत् प्रत्ययः । अस्मद् शब्दार्थस्य कर्तुः अनभिहितत्वात् षष्ठीतृतीये च।

630- तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् – 2/3/72// तुल्यार्थैर्योगे तृतीया वा स्यात्पक्षे षष्ठी । तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा । अतुलोपमाभ्यां किम्? तुला उपमा वा कृष्णस्य नास्ति ।

**631- चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः- 2/3/73//** एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी । आयुष्य, मद्र, भद्र, कुशल, सुख, अर्थ, हित एतदर्थकैरित्यर्थः । आयुष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात्

अथ सप्तमी विभक्तिः -- 632- आधारोधिकरणम् – 1/4/45// कारके इत्यधिकृतं प्रथमान्ततया विपरिणम्यते , तच्च आधारस्य विशेषणम् , आधारः कारकमधिकरणम्िति लभ्यते । कस्याधारः इत्याकाङ्क्षायाम् उपस्थितत्वात् क्रियाया इति लभ्यते। क्रिया च कर्तृकर्मगता विवक्षिता । तदाह- कर्तृकर्मद्वारा तन्निष्ठ - क्रियाया आधारः कारकमधिकरणसंज्ञः स्यात् ।

**633- सप्तम्यधिकरणे च- 2/3/36//** अधिकरणे सप्तमी स्यात्, चकारात् दूरान्तिकार्थेभ्यः। दूरान्तिकार्थेभ्यो द्वितीया च इति पूर्वसूत्रात् दूरान्तिकार्थेभ्य इत्यस्य चकारेणानुकर्षणादिति भावः । औपश्लेषिको वैषयिको अभिव्यापकश्चेत्याधारस्त्रिधा । उपश्लेषः संयोगादिसम्बन्धः । तत्प्रयोज्य आधारः औपश्लेषिकः – कटे आस्ते । स्थाल्यां पचति । विषयतासम्बन्धकृत आधारः वैषयिकः – मोक्षे इच्छा अस्ति । सकलावयवव्याप्तिकृत आधारः अभिव्यापकः – सर्वस्मिन् आत्मा अस्ति । वनस्य दूरे अन्तिके वा ।

**'साध्वसाधुप्रयोगे'–( वा. 1486.)** एतयोर्योगे सप्तमी स्यात् । साधुः कृष्णः मातरि , असाधुः मातुले ।

'निमित्तात्कर्मयोगे च'–( वा. 1490.) कर्मयोगे हेतुवाचकात् शब्दात् सप्तमी वाच्या इत्यर्थः । निमित्तमिह फलम्। योगः संयोगसमवायात्मकः इति । अयुतसिद्धयोः सम्बन्धः समवायः । अन्ययोस्तु संयोगः । चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ।। इति भाष्यम्

**634- यस्य च भावेन भावलक्षणम् – 2/3/37//** भावशब्दौ क्रियापर्यायौ इति अभिप्रेत्य व्याचष्टे- यस्य क्रियया क्रियान्तरं लक्ष्यते , ततः सप्तमी स्यात् । क्रिया च कर्त्राश्रया कर्माश्रया च । गोषु दुह्यमानासु गतः ।

**635- षष्ठी चानादरे – 2/3/38//** चात् सप्तमीत्यनुकृष्यते । अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः । अर्थात् अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः षष्ठी सप्तमी चेत्यर्थः । रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य सन्न्यस्तवान् इत्यर्थः ।

636- स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च – 2/3/39// एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः । चकारेण तदुभयानुकर्षणादिति भावः । ननु शेषषष्ठ्यैव सिद्धे किमर्थमिह षष्ठीविधानमित्यत आह – षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम्। गवां – गोषु वा स्वामी ।गवां – गोषु वा प्रसूतः ।

637- आयुक्त कुशलाभ्यां चासेवायाम् – 2/3/40// आभ्यां योगे षष्ठीसप्तम्यौ स्तः तात्पर्येऽर्थे । आयुक्तपदं व्याचष्टे – आयुक्तो व्यापारितः । आयुक्तः कुशलो वा हरिपूजने – हरिपूजनस्य वा ।

638- यतश्च निर्धारणम् – 2/3/41// जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः । तत्र जात्या पृथक्करणमुदाहरति – नृणां –नृषु वा द्विजः श्रेष्ठः । गुणेन पृथक्करण- मुदाहरति- गवां –गोषु वा कृष्णा वहुक्षीरा । क्रियया पृथक्करणमुदाहरति- गच्छतां – गच्छत्सु वा धावन् शीघ्रः । संज्ञया पृथक्करणम् – छात्राणां – छात्रेषु वा मैत्रः पटुः ।

639पञ्चमी विभक्तेः – 1/3/42// विभागो विभक्तम् ।निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात् । माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः । मथुरादेशीयाः पाटलिपुत्रदेशीयापेक्षया अतिशयेन आढ्या इत्यर्थः ।

640- साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः – 2/3/43// आभ्यां योगे सप्तमी स्यादर्चायाम् न तु प्रतेः प्रयोगे । मातरि साधुः निपुणो वा । अर्चायाम् किम्? निपुणो राज्ञो भृत्यः।

641- प्रतितोत्सुकाभ्यां तृतीया च – 2/3/44// आभ्यां योगे तृतीया स्यात् चात् सप्तमी। तत्परे प्रसितासक्ताविष्टार्थोद्युक्तः उत्सुकः इत्यमरः । वैषयिकाधिकरणत्वे सप्तम्यामेव प्राप्तायामिदं वचनम् ।

प्रसित उत्सुको वा हरिणा – हरौ वा ।

**642- नक्षत्रे च लुपि – 2/3/45//** नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीयासप्तम्यौ स्तोऽधिकरणे । मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् । मूले श्रवणे इति वा ।

**643- सप्तमीपञ्चम्यौ कारकमध्ये- 2/3/7//** कारकशब्दः कर्तृत्वादिशक्तिपरः न तु कर्त्रादिपरः व्याख्यानात् । मध्यस्यावधिद्वयसापेक्षत्वात् कारकयोर्मध्यमिति विग्रहः । तदाह- शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः । अद्य भुक्त्वाऽयं द्यहे द्यहाद्वा भोक्ता ।

**644- अधिरीश्वरे – 1/4/97/** स्वस्वामिसम्बन्धे अधिः कर्मप्रवचनीयसंज्ञः स्यात् ।

**645- यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी – 2/3/9//** अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात् । उप परार्धे हरेर्गुणाः । परार्धादधिका इत्यर्थः ।

**646- विभाषा कृञि – 1/4/98//** अधिरीश्वरे इत्यनुवर्तते । कर्मप्रवचनीया इत्यधिकृतम्। तदाह- अधिः करतौ प्राक्संज्ञो वा स्यादीश्वरेऽर्थे ।यदत्र मामधिकरिष्यति। विनियोक्ष्यत इत्यर्थः । इह विनियोक्तुरीश्वरत्वं गम्यते ।

**इति सप्तमीविभक्तिः ।**

## UNIT – V .

### अथ समासप्रकरणम् ।

**केवलश्चाव्ययीभावो द्वन्द्वस्तत्पुरुषस्तथा ।**

**वहुव्रीहिश्च विज्ञेयः समासः पञ्चधा बुधैः ॥**

तत्र समसनं समासः । स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः । पूर्वं भूतः - भूतपूर्वः । प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावो द्वितीयः । हरौ इति - अधिहरि। प्रायेणोत्तरपदार्थप्रधानः तत्पुरुषः तृतीयः । कृष्णं श्रितः - कृष्णश्रितः । तत्पुरुषभेदः कर्मधारयः ।नीलं च उत्पलं चेति - नीलोत्पलम् । कर्मधारयभेदो द्विगुः ।त्रयाणां लोकानां समाहारः - त्रिलोकी । प्रायेणान्यपदार्थप्रधानो वहुव्रीहिः चतुर्थः । पीतम् अम्वरं यस्य सः - पीताम्वरः । प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः । शिवश्च केशवश्च शिवकेशवौ ।

**647- समर्थः पदविधिः 2/1/1//** विधीयते इति विधिः कार्यम् । पदस्य विधिः पदविधिः । पदञ्च सुप्तिङन्तं तत्सम्बन्धी विधिरित्यर्थः । तदाह- पदसम्बन्धी यो विधिः स समर्थाश्रितो वोध्यः । सूत्रे समर्थशब्दः समर्थाश्रिते लाक्षणिकः इति भावः। सामर्थ्यं द्विविधम् – व्यपेक्षालक्षणम् , एकार्थीभावलक्षणं च । तत्र पृथगर्थानां पदानाम् आकाङ्क्षादिवशात् यः परस्परान्वयः तद्व्यपेक्षाभिधं सामर्थ्यम् । विशिष्टा अपेक्षा व्यपेक्षा इति व्युत्पत्तेः । राज्ञः पुरुषः इत्यादौ राजरूपार्थस्य पुरुषरूपार्थस्य आकाङ्क्षादिवशात् स्वस्वामिभावसम्बन्धेन अन्वयः इति तादृशान्वयिनोराजपुरुषरूपार्थयोर्व्यपेक्षा बोध्यते । एतत्तु व्यासवाक्ये एव सम्बद्धार्थः समर्थः इति व्युत्पत्तेः । तत्र च एकैकस्य शब्दस्य यो यः सन्निहितो योग्यश्च तेन तेनान्वयो भवति । यथा राज्ञः पुरुषः अश्वः चेति , राज्ञो देवदत्तस्य च पुरुष इति ऋद्धस्य राज्ञः पुरुष इति । समासस्थले प्रक्रियादशायां तु-

प्रत्येकमर्थवत्त्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम् एकार्थीभावलक्षणसामर्थ्यम् । सङ्गतार्थः समर्थः , संसृष्टार्थः समर्थः इति व्युत्पत्तेः । सङ्गतिः संसर्गश्च एकीभाव एव ।यथा- सङ्गतं घृतं तैलेनेति एकीभूतमिति गम्यते , यथा वा

संसृष्टोऽग्निरिति । इदं च सामर्थ्यं राजपुरुष इत्यादिवृत्तौ एव । अत एव ऋद्धस्य राजपुरुषः इत्येवं राज्ञि पुरुषविशेषणे ऋद्धत्वविशेषणं नान्वेति , विशिष्टस्य एकपदार्थतया राज्ञः पदार्थैकदेशत्वात् । समर्थः किम्- पश्य कृष्णं , श्रितो राममित्रम् अत्र कृष्णश्रितयोः परस्परान्वयाभावात् विशिष्टैकार्थोपस्थित्यजनकत्वात् न सामर्थ्यम्

**648- प्राक्कडारात्समासः – 2/1/3//** 'कडाराः कर्मधारये' इत्यतः प्राक् समास इत्यधिक्रियते आकडारात् इत्येवं प्रागिति सिद्धे प्राग्ग्रहणम् एकसंज्ञाधिकारेऽपि अव्ययीभावादिसंज्ञासमुच्चयार्थमिति भाष्ये स्पष्टम् । सम्पूर्वकस्य अस्यतेरेकीकरणात्मकः संश्लेषोऽर्थः । समस्यते अनेकं पदमिति समासः । 'अकर्तरि च कारके संज्ञायाम्' इति कर्मणि घञ् । तथा च अन्वर्थेयं संज्ञा । यदुक्तम् –

**पदानां सङ्गतार्थानां मीलितानां परस्परम् ।**

**योऽयमेकपदीभावः समासः सः प्रकीर्तितः।।**

**649- सह सुपा – 2/1/4//** सह इति योगो विभज्यते । सुवन्तं समर्थेन सह समस्यते योगविभागस्येष्टसिद्ध्यर्थ त्वात्कतिपयतिङन्तोत्तरपदोऽयं समासः । स च छन्दस्येव पर्यभूषयत् ।अनुव्यचलत् । सुप्सुपा सह समस्यते ।

परार्थाभिधानं वृत्तिः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः । वृत्त्यर्थावोधकं वाक्यं विग्रहः स च लौकिकोऽलौकिकश्च द्विधा । लोकेऽर्थविषयकबोधजनकत्वम् लौकिकत्वम् । पूर्वं भूतः इति । तद्भिन्नम् समाससाधनोपयिकम् अलौकिकम् । पूर्व + अम् ,भूत + सु इत्यलौकिकम्।

**650- सुपो धातुप्रातिपदिकयोः – 2/4/71//** एतयोरवयवस्य सुपो लुक् स्यात् । भूतपूर्वे चरट् इति निर्देशात् भूतशब्दस्य पूर्वनिपातः । पूर्वं भूतः – भूतपूर्वः ।

**651- अव्ययीभावः -2/1/5//** अधिकारोऽयम् प्राक्तत्पुरुषात् । एकसंज्ञाधिकारेऽपि अनया संज्ञया समाससंज्ञा न वाध्यन्ते इति प्राक्कडारात् इत्यत्रोक्तम् ।

**652- अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथा - पूर्व्यर्यौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु – 2/1/16//** अव्ययं , विभक्ति----वचनेषु इति पदद्वयम् । समर्थः पदविधिः इत्यतः समर्थग्रहणमनुवृत्तं तृतीयान्ततया विपरिणम्यते । समास इति अव्ययीभाव इति चाधिकृतम् । तदाह- अव्ययं समर्थेन सह समस्यते । विभक्तिश्च , समीपं च , समृद्धिश्च , व्यृद्धिश्च , अर्थाभावश्च , अत्ययश्च , असम्प्रति च ,शब्दप्रादुर्भावश्च , पश्चात् च , यथा च , आनुपूर्व्यञ्च , यौगपद्यं च , सादृश्यं च , सम्पत्तिश्च , साकल्यं च , अन्तश्च इति विभक्ति....साकल्यान्ताः , तेवचनाश्च , तेषु इति द्वन्द्वगर्भितकर्मधारय –

समासः । अतः विभक्त्यादिषु षोडशार्थेषु वर्तमानमव्ययं समर्थेन सुबन्तेन सह समस्यते , स समासः अव्ययीभावसंज्ञः स्यादित्यर्थः ।

653- **प्रथमानिर्दिष्टं समास उपसर्जनम् – 1/2/43//** समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ।

**654.उपसर्जनं पूर्वम् – 2/2/30//** समासे उपसर्जनं प्राक्प्रयोज्यम् ।

विभक्तौ तावत् – हरौ इति- लौकिकविग्रहे सप्तम्यर्थस्यैवात्र द्योतकः अधिः । हरि+ ङि+ अधि इति अलौकिकं विग्रहवाक्यम् । अव्ययीभावसमाससंज्ञायां प्रातिपदिकत्वात् 'सुपोधातुप्रातिपदिकयोः' इति विभक्तिलोपे 'प्रथमानिर्दिष्टं समासे उपसर्जनम्' इति अधि इत्यस्य उपसर्जनसंज्ञात्वात् 'उपसर्जनं पूर्वम्' अनेन पूर्वनिपातकृते अधिहरि इतिजाते सुविभक्ति आगमे 'अव्ययीभावश्च' इति अव्ययत्वात् 'अव्ययादाप् सुपः' इति सु विभक्तिलोपे अधिहरि इति सिद्धम् । समीपे – कृष्णस्य समीपम् इति लौकिकविग्रहवाक्यम् । समीपार्थस्य द्योतकम् उप इति अव्ययपदम् । कृष्ण ङस् उप सु इति स्थिते समाससंज्ञायाम् विभक्तिलोपे उप इत्यस्य उपसर्जनसंज्ञात्वात् पूर्वनिपाते उपकृष्ण इत्यवस्थायां सुविभक्तिआगमे नाव्ययीभावादतोम्त्वपञ्चम्याः इति सुस्थाने अम् आदेशे पूर्वरूपैकादेशे उपकृष्णम् इति सिद्धम्।

655- एकविभक्ति चापूर्वनिपाते- 1/2/44 विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्, न तु तस्य पूर्वनिपातः ।

**656- गोस्त्रियोरुपसर्जनस्य – 1/2/48//** ह्रस्वो नपुंसके प्रातिपदिकस्य इत्यतः ह्रस्व इति प्रातिपदिकस्येति चानुवर्तते । उपसर्जनस्येति गोस्त्रियोर्विशेषणम् । प्रत्येकाभि प्रायमेकवचनम् । स्त्रीशब्देन स्त्रीप्रत्ययो गृह्यते । प्रत्ययग्रहणपरिभाषया तदन्तविधिः उपसर्जनभूतस्य गोशब्दस्य स्त्रीप्रत्ययान्तंस्य चेति लभ्यते । तदुभयं प्रातिपदिकस्य विशेषणम् । तदन्तविधिः । तदाह- उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात् ।

**657- नाव्ययीभावादतोम्त्वपञ्चम्याः – 2/4/83//** अदन्तात् अव्ययीभावात् सुपो न लुक्, तस्य तु पञ्चमीं विना अम् आदेशः स्यात् ।

मद्राणां समृद्धिः – सुमद्रम् । यवनानां व्यृद्धिः – दुर्यवनम् । (विगतः ऋद्धिः व्यृद्धिः।) मक्षिकाणामभावः - निर्मक्षिकम् । हिमस्यात्ययः – अतिहिमम् । अत्ययः ध्वंसः निद्रा सम्प्रति न युज्यते इति – अतिनिद्रम् । हरिशब्दस्य प्रकाशः – इतिहरि विष्णोः पश्चात् – अनुविष्णु ।

योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । रूपस्य योग्यम् - अनुरूपम् अर्थम् अर्थं प्रति – प्रत्यर्थम्। शक्तिमनतिक्रम्य – यथाशक्ति । हरेः सादृश्यम् सहरि ।

658- तृतीयासप्तम्योर्बहुलम् – 2/4/84// अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावः स्यात् ।

अपदिशम्- अपदिशेन । अपदिशम् – अपदिशे।

**659- अव्ययीभावश्च -2/4/18//** अयं नपुंसकं स्यात् ।

**660-अव्ययीभावे चाकाले – 6/3/81//** सहस्य सः स्यात् अव्ययीभावे , न तु काले । चक्रेण युगपत् – सचक्रम् । सदृशः सख्या – ससखि । क्षत्राणां सम्पत्तिः – सक्षत्रम्।

**661- यथाऽसादृश्ये – 2/1/7//** असादृश्य एव यथा शब्दः , समस्यते । तेनेह न । यथा हरिस्तथा हरः । हरेरुपमानत्वं यथाशब्दो द्योतयति ।

**662-यावदवधारणे – 2/1/8//** इयत्तापरिच्छेदे गम्ये यावदित्यव्ययं समस्यते , सोव्ययीभावः इत्यर्थः । यावन्तः श्लोकाः तावन्तोऽच्युतप्रणामाः - यावच्छलोकम् । यावत् जस् श्लोक जस् इत्यलौकिकविग्रहः । विभक्तिलोपः , यावत् इत्यस्य पूर्वनिपातः , यावत्श्लोक इति समुदायात् सुविभक्त्यागमः सुस्थाने अम् आदेशः पूर्वरूपम् , यावत् श्लोकम् इतिस्थिते स्तोश्चुनाश्चुः इति श्चुत्वे छत्वे यावच्छलोकम् इति सिद्धम् ।

**663- सुप्प्रतिना मात्रार्थे – 2/1/9//** सुबिति छेदः । मात्रा लेशः । तस्मिन्नर्थे विद्यमानेन प्रतिना सुवन्तं समस्यते सोऽव्ययीभावः । शाकस्य लेशः – शाकप्रति । शाक ङस् लेश सु इत्यलौकिकविग्रहम् । सूत्रे प्रतिना पदस्य तृतीयायां प्रयोगात् न उपसर्जनत्वम्। तेन पूर्वनिपातः न भवति ।

664- अक्षशलाकासंख्याः परिणा – 2/1/10// द्यूतव्यवहारे पराजय एवार्थे समासः । अक्षेण विपरीतं वृत्तम् – अक्षपरि । अक्ष टा परि सु । एवम् – शलाकया विपरीत वृत्तम् – शलाकापरि । एकेन विपरीतं वृत्तम् – एकपरि । तथा द्विपरि , त्रिपरि, चतुष्परि । एकस्य अक्षस्य विपरीतपतनेन पराजितः इत्यर्थः ।

665- विभाषा – 2/1/11// अधिकारोऽयमिति । एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वम् । सुप्सुपा इति तु न नित्यसमासः ।

666-अपपरिबहिरञ्चवः पञ्चम्या – 2/1/12//अप , परि , बहिस् , अञ्चु ए पञ्चम्यन्तैः सुवन्तैः वा समस्यन्ते ।विष्णोः अप – अपविष्णु । पञ्चम्यन्तविष्णु शब्देन सह अप इत्यस्य समासः । विकल्पपक्षे समासाभावात् , अप इति कर्मप्रवचनीयसंज्ञकं तस्मात् पञ्चम्यपाङ्परिभिः इति पञ्चमी अप विष्णोः संसार विष्णोः परि – परिविष्णु – परि विष्णोः । वनात् बहिः – बहिर्वनम् – बहिर्वनात् वनात् प्राक् –प्राक्वनम् – प्राक्वनात् ।

आङ् मर्यादाऽभिविध्योः – 2/1/13// एतयोराङ् पञ्चम्यन्तेन वा समस्यते सोऽव्ययाभावः । मर्यादाऽभिविध्योः विद्यमानादित्यर्थः । आ मुक्तेः – आमुक्ति संसारः आ बालेभ्यः – आबालं हरिभक्तिः । समासाभावपक्षे पञ्चम्यपाङ्परिभिः इत्यने पञ्चमी विभक्तिः आ मुक्तेः , आ वालेभ्यः इति ।

**668- लक्षणेनाभिप्रतीआभिमुख्ये – 2/1/14//** आभिमख्यद्योतकादभिप्रती चिह्नवाचिना सह प्राग्वत् । समस्यते सोव्ययीभावः इत्यर्थः । अग्निम् अभि – अभ्यग्नि शलभाः पतन्ति । अग्निज्ञाप्यं तदभिमुखं च शलभपतनमित्यर्थः । अग्निं प्रति – प्रत्यग्नि।

**669- अनुर्यत्समया – 2/1/15//** यं पदार्थं समया द्योत्यते तेन लक्षणभूतेनानुः समस्यते सोव्ययीभावः । वनस्य अनु – अनुवनम् अशनिर्गतः । वस्तुतः लक्षणीभूतस्य वनस्य समीपं गतः इति वाक्यम् ।

**670- यस्य चायामः – 2/1/16//** यस्यदैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते । गङ्गायाः अनु – अनुगङ्गम् वाराणसी । गङ्गाशब्देन गङ्गादैर्घ्यसदृशं दैर्घ्यं लक्ष्यते । तदेव अनुद्योत्यम्।

**671-तिष्ठद्गुप्रभृतीनि च – 2/1/17//** एतानि निपात्यन्ते । इह शत्रादेशः,( प्रथमासमानाधिकरणत्वात् लटश्शतृशानचौ इत्यप्राप्तौ शत्रादेशः निपातनम् इति भावः) पुंवद्भावविरहः समासान्तश्च निपात्यते। तिष्ठद्गु दोहनकालः । तिष्ठन्त्यो गावो यस्मिन् काले इति लौकिकविग्रहः । स्था – तिष्ठ +शतृ+ ङीप् +जस्, गो+ जस् इति अलौकिकविग्रहकृते समाससंज्ञायाम् शत्रादेशनिपातनं विभक्तिलोपः 'गोस्त्रियोरुपसर्जनस्य' इति सूत्रेण ह्रस्वः , अव्ययसंज्ञा , सु आगमे तिष्ठद्गु + सु इति स्थिते 'अव्ययादाप्सुपः' विभक्तिलोपे तिष्ठद्गु इति सिद्धम् । आयतीगवम् –

आयत्यः गावः यस्मिन् काले इति विग्रहः , आयती+ जस् ,गो+ जस् इति स्थि
समाससंज्ञा विभक्तिलोपः 'स्त्रियाः पुंवद् इतिप्राप्तस्यपुंवद्भाव- निषेधः , 'गोरतद्धितलुकि
इति विधीयमानं टच् प्रत्ययनिपातनम् आयती – गो+ अ इत्यवस्थायां एचोयवायाव
इति अव् आदेशे सुविभक्त्युत्पत्तिः अम् आदेशे पूर्वरूपैकादेशे आयतीगवम् इ
सिद्धम्।

**672- पारे-मध्ये षष्ठ्या वा – 2/1/18//** पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्यते
एदन्तत्वं चानयोर्निपात्यते। पक्षे षष्ठीतत्पुरुषः । पारेगङ्गात्- गङ्गायाः पारात् इ
विग्रहे अव्ययीभावसमासे सति सुव्लुकि पारशब्दस्य पूर्वनिपाते निपातनात् ए
नपुंसकह्रस्वत्वे पारेगङ्गशब्दात् पुनः पञ्चम्युत्पत्तिः पारेगङ्ग ङसि इति स्थि
अदन्ततया 'अव्ययादाप्' इति न लुक् , 'नाव्ययीभावादतोम् त्वपञ्चम्याः' इ
निषेधात् 'टाङसिङसामिनात्स्याः' इति ङसिस्थाने आत् आदेशे सवर्णदीर्घैकादे
पारेगङ्गात् इति सिद्धम् । पक्षे षष्ठीतत्पुरुषः गङ्गापारात् इति। एवम् मध्येगङ्गात
– गङ्गामध्यात् इतिरूपम्।

**673- संख्या वंश्येन – 2/1/19//** वंशो द्विधा , विद्यया जन्मना च । तत्र भवो वंश्यः
तद्वाचिना सह संख्या वा समस्यते । तत्र जन्मना वंशः पुत्रादिपरम्परा इ
प्रसिद्धमेव । विद्यया तु वंशः गुरुपरम्परा। द्विमुनि – द्वौ मुनी वंश्यौ इति वि
'विशेषणं विशेष्येण वहुलम्' इति कर्मधारयं वाधित्वा अव्ययीभावः । अव्ययत्वा
सुव्लुक् । व्याकरणविद्यायाः प्रवर्तकौ द्वौ मुनी - पाणिनिकात्यायनौ इत्यर्थः । त्रिमु

व्याकरणम् । अथ जन्मना वंशमुदाहरति- एकविंशतिभारद्वाजम् – एकविंशतिः भारद्वाजाः इति कर्मधारयं वाधित्वा अव्ययीभावः ।

**674- नदीभिश्च – 2/1/20//** नदीभिः सह संख्या प्राग्वत् । नदीभिः संख्या समस्यते सोव्ययीभावः इत्यर्थः । सप्तगङ्गम् – सप्तानां गङ्गानां समाहारः इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति द्विगुसमासं वाधित्वा अव्ययीभावसमासः । द्वियमुनम् – द्वयोर्यमुनयोः समाहारः इति ।

675- अन्यपदार्थे च संज्ञायाम् – 2/1/21// अन्यपदार्थे विद्यमानं सुवन्तं नदीभिः सह नित्यं समस्यते संज्ञायाम्। विभाषाधिकारेऽपि वाक्येन संज्ञा अनवगमात् इह नित्यसमासः । उन्मत्तगङ्गम् नाम देशः – उन्मत्ता गङ्गा यस्मिन् इति विग्रहः उन्मत्ता+ सु गङ्गा+ सु समाससंज्ञा विभक्तिलोपः ,'स्त्रियाः पुंवद्'—इति उपसर्जनसंज्ञकस्य उन्मत्ताशब्दस्य पुंवद्भावः उन्मत्तगङ्गा सु इति स्थिते

अव्ययीभावनिमित्तकनपुंसकत्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः उन्मत्तगङ्ग+ सु इत्यवस्थायां 'नाव्ययीभावाद्'—इति सुस्थाने अम् आदेशे पूर्वरूपे उन्मत्तगङ्गम् इति रूपम् । लोहितगङ्गम् – लोहिता गङ्गा यस्मिन् देशे इति विग्रहः । **676- समासान्ताः – 5/4/68//** इत्यधिकृत्य । आपादपरिसमाप्तेरिति भावः

**677- अव्ययीभावे शरत्प्रभृतिभ्यः – 5/4/107//** शरदादिभ्यष्टच् स्यात् समासान्तोऽव्ययीभावे । अव्ययीभावे उत्तरपदं यत् शरदादिप्रकृतिकं सुवन्तं तदन्तात् टच् प्रत्ययः स्यात् इति भावः । उपशरदम् – शरदः समीपम् इति विग्रहम् । 'अव्ययं विभक्ति'—इत्यादिना समीपार्थकस्य उप इति अव्ययस्य शरदः इति षष्ठ्यन्तेन अव्ययीभावः टच् प्रत्ययः उपशरद इति जाते सुविभक्त्युत्पत्तिः 'नाव्ययीभावात्'– इति अम् आदेशे पूर्वरूपैकादेशे उपशरदम् इति रूपम्। शरदादिगणं पठति- शरद् , विपाश्, अनस्, मनस्, उपानह्, दिव्, हिमवत् , अनडुह्, दिश् , विश्, चेतस् , त्यद्, तद्, यद्, कियत् । उपजरसम् – जरायाः समीपम् इति विग्रहे सामीप्ये उप इति अव्ययस्य जरायाः इति षष्ठ्यन्तेन अव्ययीभावसमासे कृते सुब्लुक् , उपेत्यस्य पूर्वनिपातः । जरायाः जरस् इति जरस् आदेशे टच् प्रत्यये सुपः अम्भावः उपजरसम् इति । प्रत्यक्षम् – अक्षिणी प्रति इति विग्रहः अक्षि+ औ प्रति+ सु इति स्थिते 'लक्षणेनाभिप्रती आभिमुख्ये' इति सूत्रेण अव्ययीभावसमासः विभक्तिलोपः उपसर्जनसंज्ञकस्य प्रति इत्यस्य पूर्वनिपातः समासान्तटच् प्रत्ययः प्रत्यक्षि+ अ इति स्थिते 'यस्यति च' इति सूत्रेण इकारलोपे प्रत्यक्ष शब्दात् सुविभक्ति आगमे अम् आदेशे पूर्वरूपैकादेशे प्रत्यक्षम् इति सिद्धम् । परोक्षम् – अक्ष्णः परम् इति विग्रहः परोक्षे लिट् इति निर्देशात् निपातनात् परस्य ओकारादेशः । समक्षम् – अक्ष्णोः योग्यम् । अन्वक्षम् – अक्ष्णोः पश्चात् ।

678- **अनश्च – 5/4/108//** अव्ययीभावे इत्यनुवृत्तं पञ्चम्या विपरिणम्यते । अन इति तद्विशेषणम् । तदन्तविधिः । तदाह- अनन्तात् अव्ययीभावात् टच् स्यात् ।

679- **नस्तद्धिते – 6/4/144//** नान्तस्य भस्य टेर्लोपः स्यात् तद्धिते । उपराजम् – राज्ञः समीपम् इति विग्रहः ।

राजन्+ ङस् , उप+ सु इति स्थिते सामीप्यार्थे अव्ययीभावसमासः विभक्तिलोपः पूर्वनिपातनं समासान्तटच् प्रत्ययविधाने उपराजन्+ अ इति स्थिते नस्तद्धिते इति टेः अन् इत्यस्य लोपे उपराज शब्दात् सु आगमे अम् भावे पूर्वरूपैकादेशे उपराजम् इति सिद्धम् । अध्यात्मम् – आत्मनि इति ।

680- **नपुंसकादन्यतरस्याम् – 5/4/109//** अनन्तं यत्क्लीबं तदन्तादव्ययीभावात् टच् वा स्यात् । उपचर्मम् –उपचर्म – चर्मणः समीपम् इति विग्रहः । साम्यप्ये उपेत्यव्ययस्याव्ययीभावः । टचि टिलोपः , अम्भावः उपचर्मम् इति । टच् अभावे उपचर्मन्+ सु इति स्थिते अव्ययत्वात् सुलोपः , नलोपः प्रातिपदिकान्तस्य इति न् लोपे उपचर्म इति रूपम् ।

681- **नदीपौर्णमास्याग्रहायणीभ्यः- 5/4/110//** नदी पौर्णमासी आग्राहयाणी एतदन्तादव्ययीभावसमासात् टच् वा स्यात् । उपनदम् – उपनदि-नद्याः समीपम् । ह्रस्वो नपुंसके प्रातिपदिकस्य इति ह्रस्वः । उपपौर्णमासम् – उपपौर्णमासि – पौर्णमास्याः समीपम् ।

**682- झयः – 5/4/111//** झयन्तादव्ययीभावात् टच् वा स्यात् । उपसमिधम्

उपसमित् – समिधः समीपम् ।

**683- गिरेश्च सेनकस्य – 5/4/112//** गिर्यन्तादव्ययीभावात् टच् वा स्यात् । उपगिर

– उपगिरि – गिरेः समीपम्।

**इत्यव्ययीभावसमासप्रकरणम् ।**

**अथ तत्पुरुषसमासप्रकरणम् ।**

**684- तत्पुरुषः – 2/1/22//** अधिकारोयम् प्राक् बहुव्रीहेः ।**685- द्विगुश्च – 2/1/23** तद्धितार्थोत्तरपदसमाहारे च इति वक्ष्यमाणसमासस्य संख्यापूर्वो द्विगुः इति द्विगुसं विधास्यते । स द्विगुसमासोऽपि तत्पुरुषसंज्ञकः स्यात् । एतत्सूत्राभ एकसंज्ञाधिकारात् द्विगुसंज्ञया तत्पुरुषसंज्ञा वाध्यतेति भावः । इदं सूत्रं त्य शक्यम्। संख्यापूर्वो द्विगुश्च इति पठित्वा चकारवलेन संज्ञाद्वयसमावेशस्य सुवचत्वात समासान्तः प्रयोजनम्। पञ्चराजन् ।

**686- द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः – 2/1/24//** द्वितीयान श्रितादिप्रकृतिकैः सुवन्तैः सह वा समस्यते स तत्पुरुषः । कृष्णश्रितः – कृष्णं श्रित इति लौकिकविग्रहः , कृष्ण+ अम् , श्रित+ सु इत्यलौकिक- विग्रहः , समाससंज्ञ विभक्तिलोपः , उपसर्जनसंज्ञकस्यकृष्णशब्दस्य पूर्वनिपातः , पुनः विभक्त्युत्पत्ति कृष्णश्रित+ सु इति स्थिते अनुवन्धलोपे विसर्गादेशे कृष्णश्रितः इति रूपम् दुःखातीतः – दुःखम् अतीतः । नरकपतितः – नरकं पतितः । स्वर्गगतः – स्व गतः कूपात्यस्तः – कूपम् अत्यस्तः । सुखप्राप्तः – सुखं प्राप्तः । संकटापन्नः संकटम् आपन्नः ।

'गम्यादीनामुपसङ्ख्यानम्'–(वा. 1207.) गम्यादिप्रकृतिकैः सुवन्तैरपि द्वितीयान्तं समस्यते स तत्पुरुषः स्यात् । ग्रामगमी – ग्रामं गमी , ग्राम+ अम् , गमिन्+ सु समासः विभक्तिलोपः , ग्रामगमिन् शब्दात् पुनः विभक्त्युपत्तिः ग्रामगमिन्+ सु उपधादीर्घः , सुलोपः , नलोपः प्रातिपदिकान्तस्य इति नलोपः । अन्नबुभूक्षुः – अन्नं बुभूक्षुः ।

**687- स्वयं क्तेन – 2/1/25//** क्तप्रत्ययान्तप्रकृतिकसुवन्तेन स्वयमित्यव्ययं समस्यते सः तत्पुरुषः । स्वायङ्कृतिः – स्वायङ्कृतस्यापत्यम् । स्वयम् कृतम् इतिविग्रहे समासकृते समुदायात् अत इञ् इति सूत्रेण तद्धितान्त इञ् प्रत्ययविधाने आदिवृद्धौ स्वायङ्कृतिः इति रूपम् ।

688- खट्वा क्षेपे – 2/1/26// खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुवन्तेन समस्यते निन्दायाम् । खट्वाम्आरूढः - खट्वारूढः जाल्मः । वृत्यर्थवोधकं वाक्यं लौकिकविग्रहः । तत्र खट्वाम् आरूढः इतिवाक्यं हि गृहस्थाश्रमिणि निन्दां न गमयति । खट्वारूढ इति समासस्तु रूढ्या निन्दां गमयति ब्रह्मचर्याश्रमे । तदाह- नहि वाक्येन निन्दावगम्यते ।

**689- सामि- 2/1/27//** सामीत्यव्ययमर्धे वर्तते । तत् क्तान्तप्रकृतिकेनसुवन्तेन समस्यते इत्यर्थः । सामिकृतम् ।

**690- कालाः – 2/1/28//** कालवाचिप्रकृतिकद्वितीयान्ताः क्तप्रत्ययान्तप्रकृतिकसुवन्तेन वा समस्यन्ते इत्यर्थः । अत्यन्तसंयोगार्थं वचनम् । मासप्रमितः प्रतिपच्चन्द्रः – मासं प्रमितः । मासं परिच्छेतुमारव्धवान् इत्यर्थः।

**691- अत्यन्तसंयोगे च – 2/1/29//** अत्यन्तसंयोगे कालवाचिनो द्वितीयान्ताः सुवन्तेन सह वा समस्यन्ते इति । मुहूर्तसुखम् – मुहूर्तं सुखम् इति विग्रहः । अत्यन्तसंयोगे द्वितीया । मुहूर्तव्यापि सुखम् इत्यर्थः ।

**692-तृतीया तत्कृतार्थेन गुणवचनेन – 2/1/30//** तत्कृता इत्यस्याव्यवहितमप्यर्थेन इति परितेज्य गुणवचनेन इत्यत्रान्वयं वक्तुमाह- तत्कृत इति लुप्ततृतीयाकम् । तत्र तृतीया इत्यनेन तृतीयान्तं विवक्षितम् । तत्कृतेनेति लुप्ततृतीयाकं भिन्नं पदम्। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते । तत्कृतेत्येतच्च गुणद्वारा गुणवचने अन्वेति । ततश्च तृतीयान्तं तृतीयान्तार्थकृतो यो गुणः तद्वाचिना समस्यते , अर्थशब्देन न च तृतीयान्तं समस्यते इति वाक्यद्वयं सम्पद्यते इति भाष्ये स्थितम् तदाह- तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत् । शङ्कुलाखण्डः - शङ्कुलया खण्डः इति विग्रहः । शङ्कुला+ टा, खण्ड+ सु पूर्ववत् प्रक्रिया। धान्यार्थः – धान्येन अर्थः ।अर्थशब्दो धनपरः । हेतौ तृतीया। धान्यहेतुकं धनमित्यर्थः । ननु शङ्कुलया खण्डः इत्यत्र कर्तृकरणे कृता बहुलम् इत्येव सिद्धे तत्कृतेति व्यर्थमिति पृच्छति- तत्कृत इति किमिति । गुणवचनेन चेत् तत्कृतेनैवेति नियमार्थं तत्कृतग्रहणम् इत्यभिप्रेत्य प्रत्युदाहरति – अक्ष्णा काणः इति । न हि अक्ष्णा काणत्वं कृतं किन्तु रोगादिनेति भावः ।

**693- पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः – 2/1/31//** तृतीयान्तमेतैः प्राग्वत् । मासपूर्वः – मासेन पूर्वः । मातृसदृशः – मात्रा सदृशः । पितृसमः । ऊनार्थे- माषोनम् कार्षापणम् । माषविलकम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । आचारश्लक्ष्णः। 'अवरस्योपसंख्यानम्' – (वा. 1256.) मासावरः- मासेनावरः।

**694- कर्तृकरणे कृता बहुलम् – 2/1/32//** कर्ता च करणं चेति समाहारद्वन्द्वात् सप्तमी । तृतीया इति अनुवर्तते। प्रत्ययग्रहणपरिभाषया तदन्तग्रहणम् । कृता इत्यपि तथैव। तदाह- कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् । स तत्पुरुषः इत्यर्थः । इह कृद्ग्रहणे क्तप्रत्यय एव गृह्यते , बहुलग्रहणादिति भाष्यम्। हरित्रातः – हरिणा त्रातः। हरि+ टा, त्रात+ सु इत्यलौकिकविग्रहः , समासप्रक्रिया पूर्ववत्। नखभिन्नः – नखैः भिन्नः । ननु कृदन्तस्य समर्थविशेषणत्वेपि समासप्रत्ययविधौ तदन्तविधिप्रतिषेधात्

नखनिर्भिन्नः इन्यत्र नं स्यात् इत्यत आह – कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्। नखैः निर्भिन्नः – नख निर्भिन्नः इति सिद्धम्। कर्तृकरणे इति किम् ? भिक्षाभिरुषितः । हेतावेषा तृतीया । बहुलग्रहणं सर्वोपाधि- व्यभिचारार्थम् । तेन दात्रेण लूनवान् इत्यादौ न । कृता किम् ? काष्ठैः पचतितराम्। बहुलशब्दस्य यौगिकार्थः भवति – बहून् अर्थान् लाति इति । अतः उक्तम्-

**क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव ।**

**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ।।**

695- **कृत्यैरधिकार्थवचने – 2/1/33//** स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनम्। तत्र कर्तरि करणे च तृतीया कृत्यैः सह प्राग्वत् । वातेन च्छेद्यम् – वातच्छेद्यं तृणम्। छेत्तुं योग्यमित्यर्थः । 'ऋहलोर्ण्यत्' इति कृत्यप्रत्ययः । कोमलत्वेन स्तुतिः, दुर्वलत्वेन निन्दा वा। काकैः पेया – काकपेया नदी । 'अचो यत्' इति यत् प्रत्ययः। अत्र पूर्णाम्भस्त्वेन स्तुतिः , अल्पाम्भस्त्वेन निन्दा वा ।

696- **अन्नेन व्यञ्जनम् – 2/1/34//** संस्कारकद्व्यवाचकं तृतीयान्तमन्नेन प्राग्वत् । संस्क्रियते गुणविशेषवत्तया क्रियते अनेन इति संस्कारः, उपसेकादिसाधनं दध्यादि, तद्वाचकमित्यर्थः । अन्नम् ओदनः , तद्वाचकशब्देनेत्यर्थः । दध्योदनः – दध्ना (उपसिक्तः) ओदनः इति विग्रहः दधि+ टा , ओदन+ सु , समासः प्रक्रिया पूर्ववत् । ननु इह दध्ना इति करणत्वस्य उपसिक्तपदापेक्षत्वात् असामर्थ्यात् कथमिह समासः इत्यत आह - इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यम्। अर्थात् – उपसेकक्रियां विना दध्नः अन्नसंस्कारकत्वानुपपत्त्या दध्ना इत्यस्य दधिकरणकोपसेके वृत्तेर्नासामर्थ्यमिति भावः ।

**697- भक्ष्येण मिश्रीकरणम् – 2/1/35//** मिश्रीक्रियते खाद्यं द्रव्यमनेनेति मिश्रीकरणं गुडादि । तद्वाचकं तृतीयान्तं भक्ष्यवाचकेन समस्यते इत्यर्थः । गुडेन धानाः गुडधानाः । धानाः भृष्टयवः इत्यर्थः । मिश्रणक्रियाद्वारा सामर्थ्यम् । गुडमिश्राः धाना इति अर्थः ।

**698- चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः – 2/1/36//** प्रत्ययग्रहणपरिभाषया चतुर्थीत्यनेन चतुर्थ्यन्तं गृह्यते । तदर्थ, अर्थ , बलि , हित, सुख, रक्षित एषां द्वन्द्वः । चतुर्थ्यन्तम् एतैः षड्भिः समस्यते , सः तत्पुरुषः इति फलितम् । तदाह- चतुर्थ्यन्तार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत् । तदर्थेन प्रकृतिविकृतिभाव एव गृह्यते न तु अन्यत्र इत्यर्थः । कुतः इत्यतः आह – बलिरक्षितग्रहणाज्ज्ञापकात् । यदि तादर्थ्यमात्रे अयं समासः स्यात् , प्रकृतिविकृतिभाव एवेति नोच्येत, तर्हि बलिरक्षितग्रहणं व्यर्थं स्यात्। भूतेभ्यो बलिः , गोभ्यो रक्षितं तृणमित्यत्रापि बलेर्भूतार्थतया ,रक्षिततृणस्य गतार्थतया च तदर्थेत्येव समाससिद्धेरिति भावः । यूपदारु – यूपाय दारु इति विग्रहः , यूप+ ङे , दारु+ सु इति समासः । प्रक्रिया पूर्ववत् । यूपस्य दारुविकृतित्वाच्च । अथ प्रकृतिविकृतिभावग्रहणस्य प्रयोजनमाह - नेह- रन्धनाय स्थाली । अर्थात् , स्थाल्याश्चतुर्थ्यन्तवाच्यपाकार्थत्वेपि प्रकृतिविकृतिभावविरहान्न समासः । ननु अश्वेभ्यो घासः – अश्वघासः , धर्माय नियमः – धर्मनियमः इत्यादौ कथं तदर्थेन समासः , प्रकृतिविकृतिभावविरहात् इत्यत आह – अश्वघासादयस्तु षष्ठी समासः । अथेदानीमर्थशब्देन चतुर्थ्यन्तस्य समासे विशेषमाह- **'अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्'**–( वा. 1273.) अर्थशब्देन चतुर्थ्यन्तस्य नित्यसमास इति वक्तव्यम् । अन्यथा अर्थशब्दस्य नित्य पुंलिङ्गत्वात् परवल्लिङ्गम् इति सर्वत्र पुँल्लिङ्गतैव स्यादित्यर्थः । अर्थशव्दोऽत्र वस्तुपरः । द्विजाय अयं – द्विजार्थः सूप इति । तत्र द्विजाय अयम् इति

अस्वपदविग्रहः नित्यसमासः । तत्र अर्थशब्दस्थाने अयमिति शब्दः । द्विजाय इयं – द्विजार्था यवागूः।

द्विजाय इदम् – द्विजार्थं पयः । भूतबलिः – भूतेभ्यो बलिः इति विग्रहः, तादर्थ्यचतुर्थ्यन्तस्य बलिशब्देन समासः । गोहितम् – गोभ्यो हितमिति । गवामनुकूलमित्यर्थः । गोरक्षितम् – गोभ्यो रक्षितम् इति विग्रहः।

699- **पञ्चमी भयेन – 2/1/37//** पञ्चम्यन्तं भयशब्देन सुवन्तेन समस्यते । चोरभयम् – चोरात् भयम् इति विग्रहः चोर+ ङसि, भय+ सु इति अलौकिक विग्रहे समासः ,प्रक्रिया पूर्ववत् ।

**'भयभीतभीतिभीभिरिति वाच्यम्'–(वा. 1275.)** सूत्रे भयशब्दस्येव ग्रहणात् भीतादेरप्राप्ते समासे वचनम्। वृकभीतः- वृकेभ्यः भीतः ।

700-**अपेतापोढमुक्तपतितापत्रस्तैरल्पशः –2/1/38//** एतैः सहाल्पं पञ्चम्यन्तं समस्यते, स तत्पुरुषः सुखापेतः – सुखात् अपेतः । कल्पनापोढः , चक्रमुक्तः , स्वर्गपतितः , तरङ्गापत्रस्तः ।

701- **स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन – 2/1/39//** स्तोक, अन्तिक, दूर एतदर्थकानि , कृच्छ्र , एतानि पञ्चम्यन्तानि क्तप्रत्ययान्तेन समस्यन्ते इत्यर्थः । स्तोकान्मुक्तः – स्तोक ङसि , मुक्त सु इतिस्थिते समासः , सुपोधातुप्रातिपदिकयोः इति विभक्तिलोपप्राप्ते पञ्चम्याः स्तोकादिभ्यः इति लोपनिषेधे विभक्तिकार्ये यरोनुनासिकेनुनासिको वा इति सूत्रेण त् कारस्य न् कारादेशे स्तोकान्मुक्तः इति रूपम्। अल्पान्मुक्तः , अन्तिकादागतः , दूरादागतः , कृच्छ्रादागतः , विप्रकृष्टादागतः , अभ्यासादागतः ।

**702षष्ठी – 2/2/8//** षष्ठ्यन्तं सुबन्तेन समस्यते स तत्पुरुषः इत्यर्थः । राजपुरुषः - राज्ञः पुरुषः इति विग्रहः राजन् ङस् , पुरुष सु इत्यलौकिकविग्रहवाक्ये–समासे सति सुब्लुकि अन्तर्वर्तिनीं विभक्तिं प्रत्ययलक्षणेन आश्रित्य नलोपः पुनः विभक्त्युत्पत्तिः विसर्गादेशे राजपुरुषः इति सिद्धम् ।

**703- याजकादिभिश्च – 2/2/9//** एभिः षष्ठ्यन्तं समस्यते । ननु षष्ठी इति पूर्वसूत्रेण सिद्धे किमर्थमिदमित्यतः आह- तृजकाभ्यां कर्तरि इत्यस्य प्रतिप्रसवोयम् । ब्राह्मणयाजकः – ब्राह्मणस्य याजकः इति विग्रहः । यजतेर्ण्यन्तात् कर्तरि ण्वुल् , अकादेशः। कर्तृकर्मणोः कृति इति कर्मणि षष्ठी । समासः प्रक्रियापूर्ववत् । देवपूजकः देवानां पूजकः इति विग्रहः पूजकशब्दो याजकादिरिति भावः ।

**'गुणात्तरेण तरलोपश्चेति वक्तव्यम्'**–( वा. 3841.) तरवन्तं यद् गुणवाचि तेन सह समासस्तरलोपश्च । ननु षष्ठी इति सूत्रेणैव सिद्धे किमर्थमिदमित्यत आह – न निर्धारणे इति पूरणगुण इति च निषेधस्य प्रतिप्रसवोऽयम् । सर्वेषां श्वेततरः - सर्वश्वेतः । सर्वेषां महत्तरः – सर्वमहान् ।

**'कृद्योगा च षष्ठी समस्यत इति वाच्यम्'**–(वा. 1317.) इध्मस्य प्रव्रश्चनः - इध्मप्रव्रश्चनः ।

704- न निर्धारणे – 2/2/10// निर्धारणे या षष्ठी सा न समस्यते । नृणां द्विजः श्रेष्ठः ।

**705- पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन – 2/2/11//** पूरणगुणसुहितानि अर्थाः येषां ते पूरणगुणसुहितार्थाः , ते च सच्च अव्ययं च समानाधिकरणं चेति समाहारद्वन्द्वात् तृतीया । तदाह- पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते । पूरणे- सतां षष्ठः । गुणे – काकस्य कार्ष्ण्यम् । ब्राह्मणस्य शुक्लाः ।

706- क्तेन च पूजायाम् – 2/2/12// मतिबुद्धि--- इति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते । राज्ञां मतो , बुद्धो पूजितो वा। राजपूजितः इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य समासः । 707अधिकरणवाचिना च – 2/2/13// क्तेन षष्ठी न समस्यते । इदमेवामासितं गतं भुक्तं वा।708- कर्मणि च – 2/2/14// उभयप्राप्तौ कर्मणि इति या षष्ठी सा न समस्यते । आश्चर्यो गवां दोहोगोपेन ।709- तृजकाभ्यां कर्तरि – 2/2/15// कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः । अपां स्रष्टा । वज्रस्य भर्ता । ओदनस्य पाचकः ।

710-कर्तरि च 2/2/16// कर्तरि षष्ठ्या अकेन न समासः । भवतः शायिका । नेह तृजनुवर्तते । तद्योगे कर्तृरभिहितत्वेन कर्तृषष्ठ्या अभावात् ।

711-नित्यं क्रीडाजीविकयोः – 2/2/17// एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते । एतयोरर्थयोरकेत नित्यं षष्ठी समस्यते । उद्दालकपुष्पभञ्जिका – उद्दालकः श्लेष्मातकः, तस्य पुष्पाणि , तेषां भञ्जनमिति अस्वपदविग्रहः । संज्ञायाम् इति भावे ण्वुल् । अत्र कर्मणि षष्ठ्याः समासः। उद्दालक ङस्, पुष्पभञ्जिका सु इति नित्यसमासः । जीविकायां दन्तलेखकः – दन्तानां लेखनेन जीवतीति अस्वपदविग्रहः दन्त ङस ,लेखक सु इति प्रक्रियापूर्वत् । ननु षष्ठी इति सूत्रेणैवात्र षष्ठीसमाससिद्धेः किमर्थमिदम् इत्यत आह- तत्र क्रीडायां विकल्पे जीविकायां तृजकाभ्यां कर्तरि इति सूत्रेण निषिधे प्राप्ते वचनम् ।

712- पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे – 2/2/1// पूर्वापराधरोत्तरम् इति समाहारद्वन्द्वात् प्रथमैकवचनम् । एकदेशशब्दः अवयवे रूढः । एकदेशः अस्य अस्ति इति एकदेशी अवयवी, तेन इति लभ्यते । अधिकरणं द्रव्यम् । एकमधिकरणम् एकाधिकरणम् । एकत्वविशिष्टद्रव्ये वर्तमानेन अवयविवाचकसुवन्तेन पूर्वापराधरोत्तरशब्दाः सुवन्ताः समस्यन्ते, स तत्पुरुषः इत्यर्थः तदाह- अवयविना सह पूर्वादयः समस्यन्ते, एकत्वसंख्याविशिष्टश्चेदवयवी ।

PAGE –79.

षष्ठीसमासापवादः । पूर्वं कायस्य – पूर्वकायः , अपरं कायस्य- अपरकायः। एकदेशि...
किम्? पूर्वं नाभेः कायस्य । अर्थात् एकद्रव्यवाचिना पूर्वादयः समस्यन्त इत्येवा...
इत्यर्थः । अत्र नाभेरिति पूर्वशब्देऽन्वेति । दिग्योगे पञ्चमी । नाभ्यपेक्षया ...
पूर्वमर्धं तत् कायावयवभूतमित्यर्थः । अत्र नाभिशब्दस्य पूर्वांशे अन्वयः । अ...
पूर्वस्यांशस्य नाभिरवधिरेव,न त्ववयवी । अतो नाभिशब्देन पूर्वशब्दस्य समासो ...
भवति इत्यर्थः

713- अर्धं नपुंसकम् – 2/2/2// अर्धमिति नपुंसकलिङ्गनिर्देशादेव नपुंसकत्वे ल...
पुनर्नपुंसकग्रहणं नित्यनपुंसक- लिङ्गस्य ग्रहणमित्यभिप्रेत्याह- समांशवाच्यर्धश...
नित्यं क्लीवे , स प्राग्वत् । सः नित्यनपुंसकलिङ्गः अर्धशब्दः अवयविवाचि...
समस्यते इत्यर्थः । अर्धं पिपल्याः – अर्धपिप्पली । ननु तत्र अर्धपिप्पल्या...
अर्धपिप्पली , अर्धेन पिप्पल्याः अर्धपिप्पल्या , अर्धाय पिप्पल्याः अर्धपिप्पल्यै, अर्धा...
पिप्पल्याः अर्धपिप्पल्याः , अर्धस्य पिप्पल्याः अर्धपिप्पल्याः , अर्धे पिप्पल्या...
अर्धपिप्पल्याम् इति विग्रहेषु पिप्पलीशब्दस्य नियतविभक्तिकतया 'एकविभ...
चापूर्वनिपाते' इति सूत्रेण उपसर्जनत्वात् 'गोस्त्रियोः' इति ह्रस्वः स्यात् इत्यत आह-
एकविभक्तावषष्ठ्यन्त वचनम् । 'एकविभक्ति चापूर्वनिपाते' इति सूत्रे अषष्ठ्यन्त...
इति वक्तव्यमित्यर्थः । ततश्च पिप्पलीशब्दस्य षष्ठ्यन्तत्वात् नोपसर्जनत्वमिति न
ह्रस्वः इत्यर्थः । ननु एवं सति पञ्चानां खट्वानां समाहारः , समाहारं , समाहारेण
इत्यादिविग्रहेषु खट्वाशब्दस्य नियतविभक्तिकत्वेपि षष्ठ्यन्तत्वादनुपसर्जनत्वात्
गोस्त्रियोः इति ह्रस्वाभावे अदन्तत्वाभावेन द्विगोः इति ङीबभावे पञ्चखट्वेति स्यात्
पञ्चखट्वेति न स्यात् इत्यत आह- एकदेशिसमासविषयक
अयमुपसर्जनसंज्ञानिषेधः। तेन पञ्चखट्वी इत्यादि सिध्यति क्लीवे किम्?
ग्रामार्धः। ग्रामस्यार्धः इति विग्रहः । ग्रामस्यांशः इत्यर्थः । अर्धशब्दस्य
समांशवाचित्वाभावेन नित्यनपुंसकत्वाभावान्नायं समासः । किन्तु षष्ठी इत्येव

समासः इति षष्ठ्यन्तस्य पूर्वनिपातः । द्रव्यैक्य एव । अर्धं पिप्पलीनाम् । अत्र द्रव्यैक्याभावान्न समासः ।

**714-द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्** – 2/2/3// एतान्येकदेशिना सह प्राग्वद् वा। द्वितीयं भिक्षायाः – द्वितीयभिक्षा । एकदेशिना किम् द्वितीयं भिक्षाया भिक्षुकस्य ।

**715प्राप्तापन्ने च द्वितीयया** -2/2/4// प्राप्त-आपन्न एतौ शब्दौ द्वितीयान्तेन समस्यते इत्यर्थः । चकारो द्वितीयासमाससमुच्चयार्थः । तदाह- पक्षे 'द्वितीया श्रित'--- इति समासः । प्राप्तो जीविकां – प्राप्तजीविकः- जीविकाप्राप्तः । आपन्नजीविकः – जीविकापन्नः । इह सूत्रे द्वितीयया अ इति छित्वा अकारोपि विधीयते। तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका । आपन्नजीविका ।

716- कालाः **परिमाणिना** – 2/2/5// परिच्छेद्यवाचिना सुवन्तेन सह कालाः समस्यन्ते। मासो जातस्य – मासजातः ।

717- **सप्तमी शौण्डैः** – 2/1/40// सप्तम्यन्तं शौण्डादिभिः प्राग्वत् वा । शौण्डैः इति वहुवचननिर्देशात् गणपाठाच्च शौण्डशब्दः तदादिपरः । अक्षशौण्डः – अक्षेषु शौण्डः इति विग्रहः । अक्ष+ सुप् , शौण्ड+ सु प्रक्रिया पूर्ववत् । शौण्डः क्रियाकुशलः । वैषयिकाधिकरणत्वे सप्तमी । अक्षविषयकक्रीडाकुशलः इत्यर्थः । अधिशब्दोत्र पठ्यते। ईश्वराधीनः – ईश्वरे अधि इति विग्रहे अधीरीश्वरे इति सूत्रेण अधि इत्यस्य कर्मप्रवचनीयत्वम् । यस्मादधिकं यस्य चेश्वरवचनम् इति सप्तमी । तदन्तस्य अधिना सप्तमीसमासः सुब्लुक् , ईश्वर – अधि इति स्थिते अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः इति सूत्रेण ख प्रत्ययकृते आयनेयीनीयियः --- इति सूत्रेण ख इत्यस्य स्थाने ईन आदेशे विभक्तिकार्ये ईश्वराधीनः इति रूपम् ।

**718- सिद्धशुष्कपक्वबन्धैश्च – 2/1/41//** सप्तमीत्यनुवर्तते तदाह- एतैः सप्तम्यन्तं प्राग्वत्। साङ्काश्यसिद्धः – सङ्काशेन निर्वृत्तं नगरं साङ्काश्यम् , तत्र सिद्धः उत्पन्नो ज्ञातो वा इत्यर्थः । आतपशुष्कः – आतपे शुष्कः इति विग्रहः । स्थालीपक्वः - स्थाल्यां पक्वः इति विग्रहः । चक्रबन्धः – चक्रे बन्धः । शौण्डादिगणे एतेषां पाठाभावात् पृथगुक्तिः ।

719- ध्वाङ्क्षेण क्षेपे – 2/1/42// ध्वाङ्क्षेत्यर्थग्रहणम्, व्याख्यानात् । तदाह- ध्वाङ्क्षवादिना सह सप्तम्यन्तं समस्यते निन्दायाम् । तीर्थध्वाङ्क्षः – तीर्थे ध्वाङ्क्ष इव इति विग्रहः । ध्वाङ्क्षः काकः स इव यो गुरुकूले चिरं न तिष्ठति स इत्यर्थः। एवं हि निन्दा भवति । अर्थग्रहणस्य प्रयोजनमाह- तीर्थकाकः इत्यर्थः ।

720-कृत्यैर्ऋणे – 2/1/43// सप्तमीत्यनुवर्तते । कृत्यग्रहणेन प्रत्ययग्रहणपरिभाषया कृत्यसंज्ञकप्रत्ययान्तग्रहणम् । ऋणपदमावश्यकोपलक्षणम् इति भाष्यम् । तदाह- सप्तम्यन्तं कृत्यप्रत्ययान्तैः सह प्राग्वत् आवश्यके । मासेदेयम् ऋणम् – मासे इति सामीप्यधिकरणे सप्तमी । मासाव्यवहितोत्तरकाले प्रत्यर्पणीयमृणमित्यर्थः । मास+ ङि, देय+ सु (देयम् = दा+ यत् 'अचो यत्' इति सूत्रेण यत् प्रत्ययः ) तत्पुरुषे कृति बहुलम् इति सूत्रेण सप्तमीविभक्तिलोपाभावे विभक्तिकार्ये मासेदयम् इति रूपम् । ऋणपदस्यावश्यकोपलक्षणतायाः प्रयोजनमाह- ऋणग्रहणं नियोगोपलक्षणार्थम् । पूर्वाह्णेगेयं साम।

**721- संज्ञायाम् – 2/1/44//** सप्तमीत्यनुवर्तते । तदाह- सप्तम्यन्तं सुपा प्राग्वत्संज्ञायाम्। वाक्येन संज्ञानवगमान्नित्यसमासोयम् । अरण्येतिलकाः – अरण्ये तिलकाः इति विग्रहः अरण्य ङि , तिलक जस् हलदन्तात् सप्तम्याः संज्ञायाम् इति सूत्रेण सप्तम्याः अलुक् विभक्तकार्ये अरण्यतिलकाः इति रूपम् । एवं वनेकसेरुकाः एतौ संज्ञाशब्दौ ।

**722- क्तेनाहोरात्रावयवाः – 2/1/45//** अहोरात्रयोः अवयवाः इति विग्रहः । सप्तमीत्यनुवर्तते । क्तेनेति तदन्तग्रहणम् । तदाह- अह्नो रात्रेश्चावयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत् । अह्नरवयवस्योदाहरति – पूर्वाह्णकृतम् – पूर्वाह्णे कृतम् इति विग्रहः , पूर्वाह्ण+ ङि , कृत+ सु प्रक्रियापूर्ववत् । रात्र्यवयवस्योदाहरति- अपररात्रकृतम् – अपररात्रौ कृतम् इति विग्रहः। अवयवग्रहणं किम् ? अह्नि दृष्टम्।

**723-तत्र – 2/1/46//** तत्र इति शब्दस्वरूपग्रहणम् । सप्तमीति क्तेनिति चानुवर्तते । तदाह – तत्र इति एतत् सप्तम्यन्तं क्तान्तेन सह प्राग्वत् । तत्रभुक्तम् ।

**724-क्षेपे – 2/1/47//** सप्तमीति वचनेति चानुवर्तते । तदाह- सप्तम्यन्तं क्तान्तेन प्राग्वत् निन्दायाम् । अवतप्तेनकुलस्थितं त एतत् । स्थितमिति भावे क्तः । नकुलेन स्थितम्। 'कर्तृकरणे कृता बहुलम्' इति समासः । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् इति परिभाषया नकुलस्थितशब्दोऽपि क्तान्तः । तेन सह -अवतप्ते इति सप्तम्यन्तस्य अनेन समासे कृते अवतप्त+ ङि , नकुलस्थित+ सु इति स्थिते तत्पुरुषे 'कृति बहुलम्' इति सप्तम्यलुक् विभक्तिकार्ये अवतप्तेनकुलस्थितम् इति रूपम् । हे देवदत्त , ते तव एतत् अवस्थानम् अवतप्तेनकुलस्थितम् इति अन्वयः । यथा अवतप्तप्रदेशे नकुलाः चिरं न तिष्ठन्ति तथा कार्याणि उपक्रम्य तानि अनिवर्त्य इतस्ततो धावनमित्यर्थः । अव्यवस्थितोऽसीति निन्दा ज्ञेया । एवम् – प्रवाहेमूत्रितम्। भस्मनिहुतम् ।

**725-पात्रेसमितादयश्च – 2/1/48//** एते निपात्यन्ते क्षेपे । कृतसमासादिकार्या एते शब्दा निर्दिशन्त इत्यर्थः । पात्रेसमिताः । इण् गतौ सम्पूर्वात् गत्यर्थाकर्मक इति कर्तरि क्तः । पात्र+ ङि , समित+ जस् इति स्थिते निपातनात् सप्तम्या अलुक् । भोजनपात्रे निहिते सति सङ्गताः न तु कार्ये इत्यर्थः ।

गेहेशूरः – गेहे एव प्रकटितशौर्यः नतु युक्तः इत्यर्थः । गेहेनर्दी – नर्द शब्दे इति धातोः 'सुप्यजातौ' इति सूत्रेण णिनिः । समासे सति निपातनादलुक् । गेहे एव गर्जति , युद्धादौ तु न प्रवर्तते इत्यर्थः । आकृतिगणोऽयम् । चकारोवधारणार्थः। तेनैषां समासान्तरे घटकतया प्रवेशो न । परमाः पात्रेसमिताः इत्यादौ समासो न भवति।

**726- पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन – 2/1/49//** सुबित्यनुवृत्त बहुवचनेन विपरिणम्यते । सपेति चानुवर्तते । पूर्वः कालः यस्य स पूर्वकालः । पूर्वकालवृत्तिरित्यर्थः । ततश्च पूर्वकालेत्यनेनपूर्वकालवृत्त्यर्थकशब्दस्य ग्रहणम् । एकादिशब्दास्तु षट् स्वरूपपरा एव । तथा च पूर्वकालादयः सप्त सुबन्ताः समानाधिकरणेन सुबन्तेन समस्यन्ते , स तत्पुरुष इत्यर्थः । समानम् एकम् अधिकरणं वाच्यम् यस्येति विग्रहः । एकार्थवृत्तित्वं समानाधिकरणमिति फलितम् विशेषणं विशेष्येण – इति सिद्धे पूर्वनिपातनियमार्थं सूत्रम् । पश्चादनुलिप्तः पूर्वं स्नातत्वेन, पूर्वं स्नातो वा पश्चादनुलिप्तत्वेन विशेष्टुं शक्यते । अतो विशेषणं विशेष्येण इति समासे सति अन्यतरस्य पूर्वनिपाते प्राप्ते पूर्वकालवृत्तिशब्दस्यैव पूर्वनिपातार्थमिदं वचनम् । एवमेकादीनामपीत्यर्थः । एकशब्दविषये प्रयोजनान्तरमप्याह- एकशब्दस्य दिक्संख्येसंज्ञायाम् इति नियमबाधनार्थं च । दिक्संख्ये संज्ञायां समस्यते इति नियमस्य वक्ष्यमाणतया एकनाथ इत्यत्र विशेषणसमासस्य बाधे प्राप्ते तत्प्रतिप्रसवार्थमप्येकग्रहणमित्यर्थः । पूर्वं स्नातः पश्चात् अनुलिप्तः स्नातानुलिप्तः – स्नातश्चासौ अनुलिप्तः , स्नात सु , अनुलिप्त सु इति स्थिते समासे कृते विभक्तिलोपे पूर्वपरयोः स्थाने सवर्णदीर्घैकादेशे सुबुत्पत्तौ विभक्तिकार्ये स्नातानुलिप्तः इति सिद्धम् । विग्रहवाक्यवत् इह पूर्वपश्चात् शब्दाभावेपि स्नानानुलेपनयोः पौर्वापर्यं समासगम्यमेव। पूर्वकालः समस्यते इत्युक्ते परकालेनेत्यर्थात्प्रतीतेः । एकनाथः – एकश्चासौ नाथः इति विग्रहः । सर्वयाज्ञिकाः

– यज्ञमधीयते विदन्ति वा याज्ञिकाः । 'क्रतूक्थादिसूत्रान्तात् ठक्' । सर्वे च ते याज्ञिकाश्चेति विग्रहः । जरन्नैयायिका – जरन्तश्च ते नैयायिकाश्चेति । जीर्णनैयायिकाः इत्यर्थः । पुराणमीमांसकाः – पुराणाश्च ते मीमांसकाश्चेति । नवपाठकाः – नवाश्च ते पाठकाश्चेति । केवलवैयाकरणाः- केवलाश्च ते वैयाकरणाश्चेति विग्रहः ।

**727- दिक्सङ्ख्ये संज्ञायाम् – 2/1/50//** समानाधिकरणेन इत्यापादपरिसमाप्तेरधिकारः अर्थात् पूर्वकालैक इति सूत्रस्थं समानाधिकरणेनेत्येतत् आपादसमाप्तेरनुवर्तते इत्यर्थः। ततश्च दिक्सङ्ख्ये समानाधिकरणेन सुबन्तेन समस्यते , स तत्पुरुषः इत्यर्थः । ननु विशेषणं विशेष्येण इत्येव सिद्धे किमर्थमिदं वचनमित्यत आह- संज्ञायामेवेति नियमार्थं सूत्रम् । पूर्वेषुकामशमी – पूर्वा इषुकामशमी इति विग्रहः । पूर्वा+ सु , इषुकामशमी+ सु इत्यलौकिकविग्रहः । दिग्वाचीपूर्वशब्दस्य इषुकामशमीशब्देन समासः । विभक्तिलोपः , पूर्वनिपातः , 'पुंवत्कर्मधारयः' इति सूत्रेण पूर्वाशब्दस्यपुंवद्भावः पुनः विभक्त्युत्पत्तिः पूर्वेषुकामशमी इति रूपम्। देशविशेषस्य संज्ञेयम्। सप्तर्षयः – सप्त च ते ऋषयः इति विग्रहः । मरीच्यत्रिप्रभृतीनां सप्तानाम् ऋषीणां संज्ञेयम् ।

**728- तद्धितार्थोत्तरपदसमाहारे च – 2/1/51//** एकापि सप्तमी विषयभेदात् । भिद्यते । तत्र तद्धितार्थेत्यंशे वैषयिकाधारत्वे वर्तते । उत्तरपदेत्यंशे सामीपिकमाधारत्वमादाय परसप्तमी पर्यवस्यति । समाहारे तु वाच्यतया आधारत्वे सप्तमी । पूर्वसूत्रात् दिक्संख्ये इत्यनुवर्तते । तदाह- तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वद्वा । पौर्वशालः – पूर्वस्यां शालायां भवः इति विग्रहः । पूर्वा+ ङि , शाला+ ङि इति स्थिते 'तद्धितार्थ'– इति समासकृते विभक्तिलोपे , 'दिक्पूर्वपदादसंज्ञायां ञः इति सूत्रेण ञप्रत्ययकृते 'यस्येतिच' इति अकारलोपे , आदिवृद्धौ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः इति- पूर्वाशब्दस्य पुंवद्भावे पुनः विभक्तिकार्ये पौर्वशालः इति रूपम्।

अपरस्यां शालायां भवः- आपरशालः। अपरा ङि , शाला ङि इति अलौकिकविग्रहे प्रक्रियापूर्ववत् । षाण्मातुरः – षण्णां मातृणाम् अपत्यम् , षड्+ आम्, मातृ+ आम् इति स्थिते समासकृते विभक्तिलोपे 'यरोनुनासिके नुनासिको वा' इति डकारस्य णत्वे षण्मातृ+ अ इति स्थिते 'मातुरुत्संख्यासंभद्रपूर्वायाः' इत्यण् प्रकृतेरुकारश्चादेशः , 'तद्धितेष्वचामादेः' इति आदिवृद्धिः विभक्तिकार्यं षाण्मातुरःइति रूपम् । पञ्चगवधनः – पञ्च गावो धनं यस्येति विग्रहे पञ्चन्+ जस् , गो+ जस् , धन+ सु इति स्थिते समासकृते विभक्तिलोपे नलोपः प्रातिपदिकान्तस्य इति न् कारलोपे , पञ्च गो धन इत्यवस्थायां गोरतद्धितलुकि इति सूत्रेण टच् प्रत्यये अनुवन्धलोपे अवादेशे पुनः विभक्तिकार्ये पञ्चगवधनः।

**729- गोरतद्धितलुकि -5/4/92//** गोन्तात्तत्पुरुषात् टच् स्यात् समासान्तो न तद्धितलुकि।

**730-सङ्ख्यापूर्वो द्विगुः – 2/1/52//** सङ्ख्या पूर्वोवयवो यस्येति बहुव्रीहिः । तद्धितार्थ इति पूर्वसूत्रविहितसमासः अन्यपदार्थः प्रत्यासत्तेः । . तदाह- तद्धितार्थ– इत्यत्रोक्तस्त्रिविधः सङ्ख्यापूर्वो द्विगुः स्यात् । अर्थात् तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये इत्येवं त्रिप्रकारो यः सङ्ख्यापूर्वः समासः उक्तः स द्विगुरिति भावः ।

**731- द्विगुरेकवचनम् – 2/4/1//** द्विग्वर्थः समाहारे एकवत्स्यात् । स नपुंसकम् । समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यादिति । पञ्चगवम् – पञ्चानां गवां समाहारः इति विग्रहः , पञ्चन्+ आम् , गो+ आम् समासकृते विभक्तिलोपे 'नलोपः प्रातिपदिकान्तस्य' इति नकारलोपे 'गोरतद्धतलुकि' इति टच् प्रत्ययविधाने पञ्च-गो-अ इति स्थिते अवादेशे विभक्त्युत्पत्तिः 'स नपुंसकम्' इति सुविभक्तिस्थाने – अमादेशे पूर्वरूपैकादेशे पञ्चगवम् इति रूपम् ।

**732-कुत्सितानि कुत्सनैः – 2/1/53//** वर्तमाने क्तः , व्याख्यानात् । तदाह- कुत्स्यमानानि कुत्सनैः सह प्राग्वत्। कुत्सनैरिति करणे ल्युट् । समानाधिकरणेन समस्यते स तत्पुरुष इत्यर्थः । वैयाकरणखसुचिः – वैयाकरणश्चासौ खसुचिश्चेति विग्रहः । वैयाकरण+ सु , खसुचि +सु इति स्थिते समासकृते प्रक्रियापूर्ववत् । यः प्रक्रियां पृष्टस्तम् प्रश्ने विस्मारयितुमाकाशं दर्शयति पश्यति वा स एवमुच्यते । अत्र वैयाकरणः प्रक्रियाविस्मरणात् निन्द्यः । खसूचनं निन्दाहेतुः । मीमांसकदुर्दुरूढः – मीमांसकश्चासौ दुर्दुरूढश्च इति विग्रहः , प्रक्रिया पूर्ववत् ।

733- पापाणके कुत्सितैः – 2/1/54// पापशब्दः अणकशब्दश्च कुत्सितवाचकैः समस्यते स तत्पुरुषः इत्यर्थः । ननु विशेषणसमासेनैव सिद्धे किमर्थमिदमित्यत आह- पूर्वसूत्रापवादः । पापमस्यास्तीति मत्वर्थीयः अर्शआद्यच् । पापशब्दः पापवति वर्तते । अणकशब्दः कुरूपिणि वर्तते । ततश्च पापाणकशब्दौ निन्दहेतुभूतपापकुरूपात्मकप्रवृत्तिनिमित्तौ कुत्सनाभिधायिनौ । ततश्चानयोः पूर्वसूत्रेण समासे परनिपातः स्यात् । अतः पूर्वनिपातनियमार्थमिदं सुत्रमित्यर्थः । पापनापितः – पापश्चासौ नापितश्चेति । अणककुलालः- अणकश्चासौ कुलालश्चेति इति विग्रहः ।

734- **उपमानानि सामान्यवचनैः – 2/1/55//** उपमीयते सदृशतया परिच्छिद्यन्ते यैस्तानि उपमानानि सादृश्यनिरूपकाणीत्यर्थः । सामान्यः उपमानोपमेयसाधारणधर्मः तमुक्तवन्तः शब्दाः सामान्यवचनाः । पूर्वं सामान्यमुक्त्वा तद्वति द्रव्ये ये पर्यवस्यन्ति ते सामान्यवचनाः इति यावत् । तथा च सादृश्यनिरूपकशब्दा परपर्याया उपमानशब्दाः उपमानोपमेयसाधारणधर्मविशिष्टवाचिभिः समानाधिकरणैः समस्यन्ते स तत्पुरुषः । घनश्यामः – घन इव श्यामः इति विग्रहः । ननु इह विग्रहे घनशब्दस्य श्यामशब्दस्य चैकार्थवृत्तित्वलक्षण- सामानाधिकरण्याभावात् कथमिह समासः, इवशब्दापेक्षत्वेनासामर्थ्याच्चेत्यत आह- इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते । एवञ्च घनशब्दो लक्षणया घनसदृशे रामे

वर्तते, श्यामशब्दोपि रामे वर्तते इति सामानाधिकरण्यम् । अत एव मृगीव चपला - मृगचपला इत्यत्र पुंवत्कर्मधारय इति पुंवत्वं सिध्यति । तथा च घनसदृशश्यामः इति वोधः । सादृश्यं तद्भिन्नत्वे सति तद्गतधर्मवत्वम् ।

**735- उपमितं व्याघ्रादिभिः सामान्याप्रयोगे – 2/1/56//** उपमितं व्याघ्रादिभिः सह प्राग्वत्साधारणधर्मस्याप्रयोगे सति । समानाधिकरणैः समस्यते स तत्पुरुष इत्यर्थः । अत्रोपमितस्य नित्यमुपमानाकाङ्क्षत्वादुपमानभूत-व्याघ्रादिभिरित्यर्थसिद्धम् । पुरुषव्याघ्रः – पुरुषो व्याघ्र इव इति विग्रहः । अत्र सादृश्योपपादकः शौर्यात्मकः साधारणधर्मः , स इह नोपात्त इति भवति समासः । सामान्याप्रयोगे किम् पुरुषो व्याघ्र इव शूरः ।शौर्येण व्याघ्रसदृश इति यावत् । अत्र शौर्यस्योपामानोपमेय साधारणधर्मस्य प्रयोगात् न समास इति । **736.विशेषणं विशेष्येण वहुलम् - 2/1/57//** विशिष्यते अनेन इति विशेषणम् इतरस्मात् व्यावर्तकम् । व्यावर्त्यं तु विशेष्यं भिन्नत्वेन ज्ञायमानम् । समानाधिकरणेनेत्यधिकृतम् । तदाह- भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत् समस्यते स तत्पुरुष इत्यर्थः । नीलोत्पलम् – नीलं च तद् उत्पलम् इति विग्रहः । नीलपदं तावदुत्पलमनीलादुत्पलाद्व्यावर्तयति इति विशेषणसमर्पकम् । तस्य उत्पलपदेन विशेष्यसम्पर्केण समासः । ननु वाग्रहणेन सिद्धे बहुलग्रहणं किमर्थमित्यत आह- बहुलग्रहणात् क्वचिन्नित्यम् - कृष्णसर्पः । क्वचिन्न- रामो जामदग्न्यः ।

**737- पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च – 2/1/58//** पूर्वादयः समानाधिकरणेन समस्यन्ते इत्यर्थः । विशेषणसमासेनैव सिद्धे किमर्थमिदमित्यत आह- पूर्वनिपातनियमार्थमिदम् । पूर्ववैयाकरणः – **पूर्वश्चासौ** वैयाकरणः अपराध्यापकः ।

**738- श्रेण्यादयः कृतादिभिः – 2/1/59//** श्रेण्यादयः कृतादिभिः समानाधिकरणैः समस्यन्ते स तत्पुरुषः इत्यर्थः । **'श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यम्'–(वा. 1296.)** श्रेण्यादिषु समासविधौ च्व्यर्थवचनं च्विप्रत्ययार्थे अभूततद्भावे गम्ये श्रेण्यादीनां समासो वक्तव्य इत्यर्थः । **श्रेणीकृताः – अश्रेणयः श्रेणयः कृताः** इति विग्रहः । शिल्पेन पण्येन वा जीविनां समूहाः श्रेणयः । पूर्वं शिल्पेन पण्येन वा जीवितुमसमर्थाः इदानीं तेन जीवितुं समर्थाः कृता इत्यर्थे समासे सति श्रेणीकृताः इति भवतीत्यर्थः ।

**739- क्तेन नञ्विशिष्टेनानञ् – 2/1/60//** नञ्विशिष्टेन क्तान्तेनानञ् क्तान्तं समस्यते । अर्थात् नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सह नञ् रहितं क्तान्तं समस्यते , स तत्पुरुषः इत्यर्थः । कृताकृतम् – कृतं च तदकृतं च । एकदेशस्य करणात्कृतम् एकदेशान्तरस्वीकरणात्तदेवाकृतम् ।

**'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्'–(वा. 1310. )** वर्णो वर्णेन इति सूत्रभाष्ये इदं वार्तिकं पठितम् । शाकपार्थिवः – शाकप्रियः पार्थिवः इति विग्रहः । शाकः प्रियः यस्य स शाकप्रियः । शाकप्रियश्चासौ पार्थिवश्चेति विग्रहे बहुव्रीहिगर्भो विशेषणसमासः । तत्र पूर्वखण्डे बहुव्रीहौ उत्तरपदस्य प्रियशब्दस्य लोपः । देवब्राह्मणः - देवाः प्रियाः यस्य स देवप्रियः, स चासौ ब्राह्मणश्चेति विग्रहः । पूर्ववद् उत्तरपदस्य प्रियशब्दस्य लोपः । देवपूजको ब्राह्मणः इति वा विग्रहः ।

**740- सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः – 2/1/61//** समनाधिकरणैः समस्यन्ते स तत्पुरुषः इति शेषः । सद्वैद्यः – सन् चासौ वैद्यः इति लौकिकविग्रहः । सत्+ सु , वैद्य+ सु इति प्रक्रिया पूर्ववत् । चिकित्साशास्त्रकूलङ्कषज्ञानवत्वं सत्त्वम् । तेन वैद्यस्य पूजा गम्यते । **महावैयाकरणः** – महान् चासौ वैयाकरणश्चेति विग्रहे अनेन समासे सति महत्शब्दस्य 'आन्महतः समानाधिकरणजातीययोः' इति सूत्रेण –

आकारेन्तादेशे सवर्णदीर्घे महावैयाकरणः इति सिद्धम् । ननु उत्कृष्टो गौरित्यत्र उत्कृष्टशब्दस्य अतिशयितवाचितया तेन गौः पूजावगमात् कथमिह समासो न भवतीत्यत आह- पङ्कादुद्धृत इत्यर्थः । उत्पूर्वकः कृषधातुरिहोद्धारणार्थक इति भावः । परमवैद्यः , उत्तमवैद्यः , उत्कृष्टवैद्यः इत्यादौ गुणक्रियाशब्दैः समासे सदादीनां पूर्वनिपातनियमार्थमिदं सूत्रम् ।

**741- वृन्दारकनागकुञ्जरैः पूज्यमानम् – 2/1/62//** समानाधिकरणैः समस्यत इत्यर्थः । गोवृन्दारकः – गौः वृन्दारकः इव इति विग्रहः । अमरा, निर्जरा देवाः इत्युपक्रम्य वृन्दारका दैवतानि इत्यमरकोशाद् वृन्दारकशब्दः देवतावाची । गोनागः – गौः नाग इव । गोकुञ्जरः – गौः कुञ्जर इव । नागशब्दः कुञ्जरशब्दश्च गजवाची अत्र गोर्वृन्दारकादितुल्यत्वात् श्रेष्ठ्यं गम्यते इति पूज्यमानता । विशेषणसमासेन एव सिद्धे विशेष्यस्य पूर्वनिपातननियमार्थं सूत्रम् । ननु व्याघ्रादेराकृतिगणत्वात् उपमितं व्याघ्रादिभिः इत्येव सिद्धे किमर्थमिदमित्यत आह- व्याघ्रादेः आकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनम् । गौकुञ्जरः श्रेष्ठः इति भावः ।

**742- कतरकतमौ जातिपरिप्रश्ने- 2/1/63//** जातिपरिप्रश्ने गम्ये कतरकतमौ समानाधिकरणेन समस्यते इत्यर्थः। कतरकठः – कतरः कठः इति विग्रहः । कतर+ सु , कठ+ सु प्रक्रिया पूर्ववत् । अनयोः कः कठः इत्यर्थः । कतमकलापः – कतमः कलापः इति विग्रहः । 'गोत्रं च चरणैः सह' इति जातित्वम् । अत्र कतमशब्दस्य जातिपरिप्रश्नेन एव व्युत्पादनात् कतरार्थमेव जातिपरिप्रश्नग्रहणम्। एवञ्च अनयोः कतरो देवदत्तः इत्यत्र न भवति समासः ।

**743- किं क्षेपे – 2/1/64//** क्षेपो निन्दा । तत्र गम्ये किमित्यव्ययं समानाधिकरणेन कुत्सितपदमिति ज्ञेयम् , वाक्येन निन्दानवगमेन स्वपदलौकिकविग्रहासम्भवात् । किंराजा – कुत्सितः राजा इति लौकिक अस्वपदविग्रहः । किम्+ सु , राजन्+ सु इति

प्रक्रियापूर्ववत् । ननु राज्ञो बहुसम्पत्तिशालिनः कथं कुत्सितत्वमित्यत आह – यो न रक्षतीति स किंराजा इति अन्वयः ।

अथ कर्मधारयकार्यं वक्ष्यन् कर्मधारयसंज्ञामाह- **745- तत्पुरुषः समानाधिकरणः कर्मधारयः – 1/2/42//** समानम् एकमधिकरणं वाच्यं ययोः पदयोः , ते समानाधिकरणे पदे , ते अस्य स्त इति समानाधिकरणः , मत्वर्थीयः अर्शआद्यच् । समानाधिकरणानेकपदावयवकस्तत्पुरुषः कर्मधारयसंज्ञकः भवतीत्यर्थः । **746.पुंवत्कर्मधारयजातीयदेशीयेषु – 6/3/42//** स्त्रियाः पुंवद्भाषितपुंस्कादनूङिति वर्तते एकापि सप्तमी विषयभेदात् भिद्यते । कर्मधारयांशे अधिकरणसप्तमी जातीयदेशीयविषये परसप्तमी । तदाह-कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्पर ऊङ्भावो यस्मिंस्तथाभूतं पूर्वं पुंवत् । ननु कर्मधारये स्त्रियाः पुंवत् इत्यनेन सिद्धं पुंवत्वम् , जातीयदेशीययोस्तु तसिलादिष्वाकृत्वसुचः इत्यनेन सिद्धमित्यत आह-

पूरणीप्रियादिष्वप्राप्तः पुंवद्भावोनेन विधीयते इति । अपूरणीप्रियादिष्विति पर्युदासादिति भावः । महानवमी – महती चासौ नवमी इति विग्रहः , महती सु , नवमी सु समासकृते महती इत्यस्य पुंवद्भावे महत् नवमी इति स्थिते आन्महतः समानाधिकरणजातीययोः इति आकारान्त्यादेशे महानवमी इति सिद्धम्। कृष्णचतुर्दशी – कृष्णा चासौ चतुर्दशी । महाप्रिया – महती चासौ प्रिया । पुंवद्कर्मधारय इत्यस्य प्रयोजनान्तरमाह - तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते । न कोपधायाः , संज्ञापूरण्योश्च , वृद्धिनिमित्तस्य च तद्धितस्मारक्तविकारे , स्वाङ्गाच्चेतः , जातेश्च इति पञ्चसूत्र्या प्रतिषिद्ध इत्यर्थः । पाचकस्त्री – पाचिका चासौ स्त्री इत्यत्र न कोपधायाः इति पुंवत्त्वस्य प्रतिषेधः प्राप्तः अतः अनेन पुनः प्रतिषेधे पाचकस्त्री इति सिद्धम् । दत्तभार्या – दत्ता चासौ भार्या , पञ्चमभार्या – पञ्चमी चासौ भार्या अत्र

संज्ञापूरण्योश्च इति प्रतिषेधः प्राप्तः सुकेशभार्या – सुकेशी चासौ भार्या
स्वाङ्गाच्चइति निषेधः प्राप्तः । ब्राह्मणभार्या – ब्राह्मणी चासौ भार्या अत्र जातेश्च
निषेधः प्राप्तः । अथ जातीयदेशीययोः प्रतिप्रसवमुदाहरति – एवं पाचकजातीया
पाचकदेशीया इत्यादि । प्रकारवचने इति जातीयर्- ईषदसमाप्तौ इति देशीयर्
उभयत्रापि तसिलादिषु इति पुंवत्त्वस्य न कोपधाया इति निषेधः प्राप्तः ।

**747- प्रशंसावचनैश्च** – 2/1/66// एतैः सह जातिः प्राग्वत् । प्रशंसावाचकैरित्यर्थः । समानाधिकरणैः समस्यते स तत्पुरुषः इत्यर्थः । गोमतल्लिका – मतल्लिका चासौ गौश्चेति विग्रहः । मतल्लिका सु , गो सु इति स्थिते समासे गोशब्दस्य पूर्वनिपाते गोमतल्लिका इति रूपम् । अत्र पूर्वनिपातनियमार्थं सुत्रम् ।

**748- युवा खलतिपलितवलिनजरतीभिः** – **2/1/67//** युवन्शब्दः खलत्यादिभिः समानाधिकरणैः समस्यते स तत्पुरुषः इत्यर्थः। पूर्वनिपातनियमार्थं सूत्रम् । युवाखलतिः युवखलतिः ।

**749- कृत्यतुल्याख्या अजात्या** – **2/1/68//** कृत्यप्रत्ययान्ताः तुल्यवाचकाः जातिभिन्नवाचकेन समानाधिकरणेन समस्यन्ते स तत्पुरुषः इत्यर्थः । भोज्योष्णम् – भोज्यं च तद् उष्णं चेति विग्रहः ऋहलोर्ण्यत् इति अर्हे कृत्यप्रत्ययः। तुल्यश्वेतः – तुल्यश्चासौ श्वेतश्चेति । आख्याग्रहणस्य प्रयोजनमाह- सदृशश्वेतः , सदृशशब्दस्य तुल्यपर्यायत्वादिति भावः । अजात्या किम् ? भोज्य ओदनः । अत्र ओदनशब्दस्य जातिवाचित्वात् तेनायं समासो न भवतीत्यर्थः ।

**750- वर्णो वर्णेन** – **2/1/69//** समानाधिकरणेन सह प्राग्वत् । वर्णवाचिना समानाधिकरणेन वर्णवाची समस्यते स तत्पुरुषः इत्यर्थः । कृष्णसारङ्गः – कृष्ण

चासौ सारङ्गश्चेति इति विग्रहः । सारङ्गश्चित्रवर्णवान् । कृष्णशब्दः कृष्णावयवके लाक्षणिकः इति सामानाधिकरण्यम् ।

**751- कडाराः कर्मधारये** – **2/2/38//** 'उपसर्जनम् पूर्वम्' इत्यतः पूर्वमित्यनुवर्तते । कडाराः इति बहुवचननिर्देशात् तदादिग्रहणम् । तदाह-कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः। कडाराश्चासौ जैमिनिश्चेति – कडारजैमिनिः , जैमिनिकडारः वा ।

**752- कुमारः श्रमणादिभिः** – **2/1/70//** कुमारशब्दः श्रमणादिभिः समानाधिकरणैः समस्यते स तत्पुरुषः इत्यर्थः । कुमारश्रमणा – कुमारी चासौ श्रमणा चेति विग्रहः । पुंवत्कर्मधारयः इति पुंवत्वम् ।

**753- चतुष्पादो गर्भिण्या** – **2/1/71//** चतुष्पाज्जातिवाचिना गर्भिणीशब्देन सह प्राग्वत्। गोगर्भिणी – गर्भिणी चासौ गौश्चेति विग्रहः । विशेषणस्य पूर्वनिपातनार्थं सूत्रम् ।

**754- मयूरव्यंसकादयश्च** – **2/1/72//** एते निपात्यन्ते । मयूरव्यंसकः – व्यंसकश्चासौ मयूरश्चेति विग्रहः । व्यंसको धूर्तः । गुणवचनत्वात् व्यंसकशब्दस्य पूर्वनिपाते प्राप्ते इदं वचनम् ।

**755- ईषदकृता** – **2/2/7//** ईषच्छब्दः अकृदन्तप्रकृतिकसुबन्तेन समस्यते स तत्पुरुष इत्यर्थः । ईषत्पिङ्गलः ।

**756- नञ्** – **2/2/6//** इदं समानाधिकरणाधिकारस्थं नेत्यभिप्रेत्याह – नञ् सुपा सह समस्यते ।

**757- नलोपो नञः** – **6/3/73//** नेति लुप्तषष्ठीकं पदम् । तदाह- नञो नस्य लोपः स्यादुत्तरपदे । अब्राह्मणः – न ब्राह्मणः इति विग्रहः । नञ् , ब्राह्मण सु इति स्थिते समासे कृते विभक्तिलोपे , नकारस्य लोपे पुनः विभक्त्युत्पत्तौ अब्राह्मणः इति सिद्धम्।

अत्रारोपितत्वं नञर्थः । आरोपितत्वं च ब्राह्मणत्वद्वारा ब्राह्मणे अन्वेति । अर्थात् ब्राह्मणभिन्न इति पर्यवस्यति आरोपितब्राह्मणत्ववानिति बोधः ।

**758- तस्मान्नुडचि – 6/3/74//** तच्छब्देन पूर्वसूत्रावगतो लुप्तनकारो नञ् परामृश्यते । उत्तरपद इत्यनुवृत्तमचि इत्यनेन विशिष्यते । तदादिविधिः । उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् परत्वात् इति परिभाषया सप्तमी षष्ठीं प्रकल्पयति । तदाह- लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुमागमः स्यात् । अनश्वः – न अश्वः इति समासे सति नञो नकारस्य लोपे तत्परिशिष्टाकारस्य नुट् । टकार इत् । उकार उच्चारणार्थः।

**नञो नलोपस्तिङि क्षेपे – वा. 3984.** नलोपो नञः इति सूत्रस्थवार्तिकमिदम् । नञो नकारस्य लोपः स्यात् तिङि परे निन्दायामिति वक्तव्यमित्यर्थः । अ-पचसि त्वं जाल्मः । कुत्सितं पचतीत्यर्थः । अत्र अ इति भिन्नं पदं तिङन्तेन समासाभावात् । वार्तिकमिदं प्रसङ्गादुपन्यस्तम् । नञ् समानार्थेकेन अ इत्यव्ययेनापि सिद्धमिदमिति वार्तिकं विफलमेव।नैकधा – इत्यादौ तु न- शब्देन सह सुपा इति समासः। एतदर्थमेव नञ् इति सूत्रे नलोपो नञः इति सूत्रे च ञकारानुवन्धग्रहणमिति भावः ।

**759- नभ्राण्नपान्नवेदान्तासत्यानमुचिनकुलखनपुंसकनक्षत्रनक्रानाकेषु प्रकृत्या - 6/3/75//** एषु एकादशशब्देषु नञः प्रकृतिभावः स्यात् इत्यर्थः । पाद् इति शत्रन्तः। नपात् – न पाति इति विग्रहिः। पा+ शतृ इति स्थिते अत् जाते नलोपाभावस्य निपातनम् । वेदाः इत्यसुन्नन्तः । नवेदाः – न वेत्ति इति विग्रहः । न- विद्+ असुन् = अस् –(सर्वधातुभ्योसुन् – 4/1/89// ) न – वेदस् सु नलोपाभावनिपातनम् । (अत्वसन्तस्य चाधातोः) इति दस्यदीर्घः – न- वेदास्+ सु , विभक्तिलोपः नवेदाः इति सिद्धम् । न कुलमस्य नकुलम् । न खमस्य नखम्। न स्त्रीपुमान् नपुंसकम् । न क्षरतीति नक्षत्रम् । न क्रामतीति नक्रः । न अकमस्मिन्निति नाकः ।

**760-नगोऽप्राणिष्वन्यतरस्याम्** – 6/3/77// नग इत्यत्र नञ्प्रकृत्या वा । न गच्छन्ति – नगाः – अगाः पर्वताः । अप्राणिष्विति किम् ? अगो वृषलः शीतेन ।

**761- कुगतिप्रादयः** – 2/2/18// एते समर्थेन नित्यं समस्यन्ते । स तत्पुरुषः इत्यपि ज्ञेयम् । कुत्सितः पुरुषः – कुपुरुषः । नित्यसमासत्वात् अस्वपदविग्रहः । कुत्सितार्थकस्य कु इत्यव्ययस्यैवात्र ग्रहणं न तु पृथ्वीपर्यायस्य, गत्यादिसाहचर्यात्।

**762- ऊर्यादिच्विडाचश्च** – 1/4/61// एते क्रियायोगे गतिसंज्ञाः स्युः । ऊरीकृत्य ।

**763- अनुकरणं चानितिपरम्** – 1/4/62// अनुकरणं गतिसंज्ञं स्यात् इतिपरं वर्जयित्वा इत्यर्थः । खाट्कृत्य । अनिति किम्? खाडिति कृत्वा निरष्ठिवत् ।

**767- कणेमनसीश्रद्धाप्रतीघाते** – 1/4/66// कणेशब्दो मनश्शब्दश्च श्रद्धाप्रतीघाते गतिसंज्ञौ स्तः । कणेहत्य पयः पिवति । मनोहत्य ।

**768- पुरोऽव्ययम्** – 1/4/67// पुर इत्यव्ययं गतिसंज्ञकं स्यात् । पुरस्कृत्य ।

**769- अस्तं च** – 1/4/68// अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात् । अस्तङ्गत्य।

**770- अच्छगत्यर्थवदेषु-** 1/4/69// गत्यर्थधातुषु वदधातौ च - प्रयुज्यमानेषु अच्छेत्यव्ययं गतिसंज्ञं स्यात् । अच्छगत्य । अच्छोद्य।

**771- अदोऽनुपदेशे** – 1/4/70//अदशब्दः अनुपदेशे गतिसंज्ञं स्यात् ।

**772- तिरोऽन्तधौ** – 1/4/71// अन्तर्धिः व्यवधानम्, तत्र तिरस् इत्यव्ययं गतिसंज्ञकं स्यात् । तिरोभूय ।

**773- विभाषा कृञि** – 1/4/72// कृञि प्रयुज्यमाने तिरस् इत्यव्ययं गतिसंज्ञं वा स्यात्। तिरस्कृत्य ।

**774- उपाजेऽन्वाजे – 1/4/73//** एतौ कृञि वा गतिसंज्ञौ स्तः । उपाजेकृत्य , उपाजे कृत्वा ।

**775- साक्षात्प्रभृतीनि च – 1/4/74//** कृञि वा गतिसंज्ञानि स्युः । साक्षात्कृत्य , साक्षात् कृत्वा ।

**776- अनत्याधान उरसिमनसो – 1/4/75//** उरसि , मनसि – इति विभक्तिप्रति- रूपके अव्यये गतिसंज्ञे वा स्तः अनत्याधाने । उरसिकृत्य , उरसि कृत्वा ।

**777- मध्ये-पदे-नविचने च -1/4/76//** एते कृञि वा गतिसंज्ञाः स्युरनत्याधाने । मध्येकृत्य , मध्ये कृत्वा ।

**778- नित्यं हस्तेपाणावुपयमने – 1/4/77//** कृञि । उपयमनं विवाहः । स्वीकारमात्र- मित्यन्ये । हस्तेकृत्य , पाणौकृत्य ।

**779- प्राध्वं बन्धने – 1/4/78//** प्राध्वम् इत्यव्ययम् । बन्धने गम्ये प्राध्वमित्यव्ययं गतिसंज्ञकं स्यात् । प्राध्वंकृत्य । बन्धनेनानुकूल्यं कृत्वेत्यर्थः ।

**780- जीविकोपनिषदावौपम्ये – 1/4/71//** उपमैव औपम्यं, तस्मिन्विषये जीविका - शब्दः उपनिषच्छब्दश्च कृञा योगे गतिसंज्ञौ स्तः ।

जीविकामिव कृत्वा जीविकाकृत्य । उपनिषदमिव कृत्वा उपनिषत्कृत्य ।

**781-तत्रोपपदं सप्तमीस्थम् – 3/1/92//** अधिकारोऽयम् । सप्तमीति तदन्तग्रहणम् । सप्तम्यन्ते पदे वाच्यवाचकभावसम्बन्धेन तिष्ठतीति सप्तमीस्थम् । सप्तम्यन्तवाच्यमिति यावत् । सप्तम्यन्ते पदे कर्मणि इत्यादौ वाच्यत्वेन स्थित कुम्भादि तद्वाचकंपदमुपपदसंज्ञं स्यात् । तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात्

**782- उपपदमतिङ्** – **2/2/29//** उपपदं सुबन्तं समर्थेन नित्यं समस्यते । अतिङन्तश्चायं समासः । कुम्भं करोतीति – कुम्भकारः । इह कुम्भ+ अस् कार इत्यलौकिकं प्रक्रियावाक्यम् । अतिङ् किम्? मा भवान्भूत् ।

**783- अमैवाव्ययेन- 2/2/20//** अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते । स्वादुङ्कारम् ।

**784.तृतीयाप्रभृतीन्यन्यतरस्याम्** – **2/2/21//**'उपदंशस्तृतीयाम्' (सू- 3368) इत्यादीन्यु – पपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते ।

**785- क्त्वा च** – **2/2/22//** तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते । उच्चैःकृत्य – उच्चैः कृत्वा ।

**786- तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः -5/4/86//** अथ तत्पुरुषेषु असाधारणसमासान्तानान् वक्तुमुपक्रमते - । अच्प्रत्यन्ववपूर्वात् इत्यतः अजित्यनुवर्तते , समासान्त इत्यधिकृतम् । तेन समासस्य अन्तावयव इति लभ्यते प्रत्ययः परश्च इत्यधिकारात् अच्प्रत्ययस्य तत्पुरुषात् परत्वेपि तस्य तदवयवत्वात् अङ्गुलेरिति अवयवषष्ठी । अङ्गुलेरिति तत्पुरुषविशेषणं तदन्तविधिः । तदाह- सङ्ख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोच् स्यात् । सङ्ख्या च अव्ययं च सङ्ख्याव्यये ते आदी यस्येति विग्रहः ।

द्वे अङ्गुली प्रमाणमस्य – द्व्यङ्गुलं दारु । द्वि+ औ , अङ्गुली+ सु इति स्थिते तद्धितार्थोत्तरपदसमाहारे च इति समासकृते विभक्तिलोपः समासान्तोच् प्रत्ययः, प्रक्रियापूर्ववत् । निर्गतमङ्गुलिभ्यो – निरङ्गुलम् ।

**787- अहस्सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः** – **5/4/87//** एभ्यो रात्रेरच्स्यात् , चात्सङ्ख्याव्ययादेः । अहन् , सर्व , एकदेश , सङ्ख्यात, पुण्य एभ्यः परस्य रात्रिशब्दस्येत्यर्थः । अहन्नादिपूर्वपदकस्य रात्र्यन्तस्य तत्पुरुषस्य इति यावत् । ननु

अहरादिः रात्र्यन्तस्तत्पुरुषो नास्त्येव । अह्नो रात्रिरिति वा अहश्चासौ रात्रिश्चेति वा असम्भवादित्यत आह- अहर्ग्रहणं द्वन्द्वार्थम् । अहश्च रात्रिश्च- अहोरात्रः , द्वन्द्वादच् , इलोपः , जातिरप्राणिनाम् इत्यकवत्त्वम् । रात्राह्नाहाः पुंसि इति पुंस्त्वम् । सर्वा रात्रिः – सर्वरात्रः ।

**788- राजाहस्सखिभ्यष्टच् – 5/4/91//** तत्पुरुषस्याङ्गुलेः इत्यतः तत्पुरुषस्येत्यनुवृत्तं पञ्चमीवहुवचनत्वेन विपरिणतं राजाहस्सखिभ्य इत्यनेन विशेष्यते । तदन्तविधिः , तदाह- एदन्तात्तत्पुरुषात् टच् स्यात् । परमश्चासौ राजा – परमराजः । समासान्तटच्। अतिक्रान्तो राजानम् – अतिराजः। कृष्णस्य सखा – कृष्णसखः । समासान्तटच् । यस्येति च इति इकारलोपः ।

**789- अह्नष्टखोरेव – 6/4/145//** एतयोरेव परतोह्नष्टिलोपः स्यात् नान्यत्र । उत्तमाहः । द्वे अहनी भृतो द्व्यहीनः ऋतुः ।

**790- अह्नोह्न एतेभ्यः – 5/4/88//** पूर्वसूत्रे अहस्सर्वैकदेशसङ्ख्यातपुण्यशब्दा निर्दिष्टाः । तत्र चकारेण सङ्ख्याव्यये अनुकृष्टे । अहश्शब्दवर्जं ते सर्वे एतच्छब्देन परामृश्यन्ते न त्वहश्शब्दः , अहश्शब्दात् परस्यअहन्शब्दस्य तत्पुरुषे असम्भवादित्यभिप्रेत्य व्याचष्टे – सर्वादिभ्यः परस्याहन्शब्दस्याह्नादेशः स्यात् समासान्ते परे । एतत्तु प्रकरणाल्लब्धम् ।

**791-अह्नोदन्तात् – 8/4/7//** पूर्वपदात्संज्ञायाम् इत्यतः पूर्वपदात् इति अनुवृत्तम् । अदन्तादित्यत्रान्वेति । रषाभ्यां नो णः समानपदे इति सूत्रं षकारवर्जमनुवर्तते । पूर्वपदादित्यनेन पूर्वपदस्थादिति विवक्षितम् । तदाह- अदन्तपूर्वस्थाद्रेफात्परस्याह्नादेशस्य नस्य णः स्यात् । सर्वाह्णः - सर्वमहः इति विग्रहे पूर्वकाले इति समासे राजाहस्सखिभ्यः इति टच् , अह्नादेशः , णत्वं , रात्राह्नाहाः इति पुंस्त्वम् ।

792- **क्षुम्नादिषु च – 8/4/39//** एषु णत्वं न स्यात् । दीर्घाह्नी प्रावृट् । 793- **न सङ्ख्यादेः समाहारे – 5/4/89//** समाहारे वर्तमानस्य सङ्ख्यादेरह्नादेशो न स्यात् । ननु सङ्ख्यादिभिन्नस्य तत्पुरुषस्य समाहारे अभावादेव सिद्धे सङ्ख्यादेरिति व्यर्थमित्यत आह – सङ्ख्यादेः इति स्पष्टार्थम् । द्वयोरह्नोः समाहारो – द्व्यहः । त्र्यहः ।

794- **उत्तमैकाभ्यां च – 5/4/90//** आभ्यामह्नादेशो न । ननु उत्तमशब्दात् परस्याहन्शब्दस्य अह्नादेशाप्रसक्ते रुत्तमग्रहणं व्यर्थमित्यत आह- उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह । पुण्याहम् – पुण्यम् अहः । पुण्य सु , अहन् सु इति स्थिते विशेषणं विशेष्येण बहुलम् इति समासे विभक्तिलोपे समासान्तटच् , अह्नादेशनिषेधे टिलोपे विभक्तिकार्ये पुण्याहम् इति सिद्धम् ।

795- **अग्राख्यायामुरसः – 7/4/93//** टच् स्यात् । अश्वानामुर इव अश्वोरसम् ।

796- **अनोऽश्मायस्सरसां जातिसंज्ञयोः – 5/4/94//** टच् स्यात् जातौ संज्ञायां वा । उपानसम् , अमृताश्मः , कालायसम् ।

797- **ग्रामकौटाभ्यां च तक्ष्णः – 5/4/95//** आभ्यां टजिति । ग्रामस्य तक्षा ग्रामतक्षः। कुट्यां भवः कौटः । स चासौ तक्षा च कौटतक्षः ।

798- **अतेः शुनः – 5/4/96//** अतीत्यव्ययात् परो यः श्वन्शब्दः तदन्तात्तत्पुरुषात् टच् स्यात् । अतिश्वो वराहः । अतिश्वी सेवा ।

799- **उपमानादप्राणिषु -5/4/97//** अप्राणिविषयकोपमानवाचिनः शुनष्टच् स्यात् । आकर्षः श्वेवाकर्षश्वः ।

800- **उत्तरमृगपूर्वाच्च सक्थ्नः – 5/4/98//** उत्तर , मृग, पूर्व एभ्यः उपमानाच्च- परो यः सक्थिशब्दः तदन्तात्तत्पुरुषात् टच् स्यात् । उत्तरसक्थम् । पूर्वसक्थम् ।

**801- नावो द्विगोः – 5/4/99//** नौशब्दान्ताद् द्विगोष्टच् स्यात् , न तु तद्धितलुकि। द्वाभ्यां नौभ्यामागतो द्विनावरूप्यः ।

**802- अर्धाच्च – 5/4/100//** अर्धान्नावष्टच् स्यात् । नावोऽर्धम् – अर्धनावम् ।

**803- खार्याः प्राचाम् – 5/4/101//** द्विगोरर्धाच्च खार्याष्टज्वा स्यात् । द्विखारम् - द्विखारि । अर्धखारम् – अर्धखारि ।

**804- द्वित्रिभ्यामञ्जलेः – 5/4/102//** टज्वा स्याद् द्विगौ । द्व्यञ्जलम् – द्व्यञ्जलि।

**805- ब्रह्मणो जानपदाख्यायाम् –5/4/104//** ब्रह्मान्ताततत्पुरुषात् टच् स्यात् समासेन जानपदत्वमाख्यायते चेत् । सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः ।

**806- कुमहद्भ्यामन्यतरस्याम् – 5/4/105//** आभ्यां ब्रह्मणो वा टच् स्यात् तत्पुरुषे। कुत्सितो ब्रह्मा कुब्रह्मः – कुब्रह्मा ।

**807-आन्महतः समानाधिकरणजातीययोः – 6/3/46//**महतः आकारोन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे ।

महाब्रह्मः – महांश्चासौ ब्रह्मा इति विग्रहः । सन्महत् इत्यदिना समासः । आत्वम् सवर्णदीर्घः । कुमहद्भ्याम् इति टच् । टिलोपः । टजभावे आत्वे महाब्रह्मा इति रूपम्। महादेवः।

**808- द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः – 6/3/49//** शेषपूरणेन सूत्रं व्याचष्टे - आत्स्यात् । द्विशब्दस्य अष्टन्शब्दस्य च सङ्ख्यावाचके उत्तरपदे परे आत्स्यात् न तु बहुव्रीह्यशीत्योरित्यर्थः । द्वौ च दश च द्वादश । द्व्यधिका दश इति वा । अष्टादश । अष्टाविंशतिः । अबहुव्रीह्यशीत्योः किम्? द्वित्राः

**809.त्रेस्त्रयः – 6/3/48//** सन्धिवेलादिषु त्रयोदशीति पाठात् सकारान्तोऽयमादेश इत्याह- त्रिशब्दस्य त्रयस् स्यात् पूर्वविषये । प्राक्शतात् सङ्ख्याशब्दे उत्तरपदे परतः न तु बहुव्रीह्यशीत्योरित्यर्थः । त्रयोदश – त्रयश्च दश चेति त्र्यधिका दशेति वा विग्रहः । सुब्लुकि ,त्रिशब्दस्य त्रयस् , रत्वम् , उत्वम् , आद्गुणः । एवं त्रयोविंशतिः ।

**810-विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् – 6/3/49//** व्यवहितस्यापि द्व्यष्टनोरित्यस्य सम्बन्धाय- सर्वेषामिति । द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे । द्विचत्वारिंशत् – द्वाचत्वारिंशत् ।

**812-परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः – 2/4/26//** परवदिति षष्ठ्यन्ताद्वतिः । तदाह- एतयोः परपदस्येव लिङ्गं स्यात् । द्वन्द्वपदमत्र इतरेतरयोगद्वन्द्परम् , समाहारेद्वन्द्वे स नपुंसकम् इत्यस्य तदपवादत्वात् । कुक्कुटमयूर्याविमे – कुक्कुटश्च मयूरी च इति द्वन्द्वः । उत्तरपदस्य मयूरीशब्दस्य इव स्त्रीलिङ्गः । मयूरीकुक्कुटाविमौ – मयूरी च कुक्कुटश्च इति द्वन्द्वः , उत्तरपदस्य कुक्कुटशब्दस्य इव पुंलिङ्गः । अत्र द्वन्द्वे अवयवलिङ्गेनानियमे प्राप्ते नियमार्थमिदम् ।

**द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः** –(वा. 1547.) द्विगु, प्राप्त , आपन्न , अलम्पूर्व, गतिसमास एतेषु परवल्लिङ्गस्य प्रतिषेधो वक्तव्य इत्यर्थः । पञ्चसु कपालेषु संस्कृतः – पञ्चकपालः पुरोडाशः । उत्तरपदस्य नपुंसकत्वम् समासस्य नपुंसकत्वं प्राप्तं न भवति, किन्तु विशेष्यलिङ्गमेव । प्राप्तो जीविकां – प्राप्तोजीविकः। अत्र उत्तरपदस्य जीविकाशब्दस्य यल्लिङ्गं तत्समासस्य न भवति ।

**814-रात्राह्नाहाः पुंसि – 2/4/29//** द्वन्दवतत्पुरुषयोरित्यनुवृत्तं , प्रथमाबहुवचनेन विपरिणतं रात्रादिभिर्विशेष्यन्ते, तदन्तविधिः । रात्राह्नाहान्तद्वन्द्वतत्पुरुषाः । पुंसीत्यर्थः। फलितमाह- एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । परवल्लिङ्गताऽपवादः । ननु अहोरात्र इति समाहारद्वन्द्वे स नपुंसकम् इति नपुंसकत्वप्रसङ्गः। न च

नपुंसकत्वस्याप्ययं पुंस्त्वविधिरपवाद इति वाच्यम् , पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान् इति न्यायेन अस्य पुंस्त्वविधेः परवल्लिङ्गतामात्रापवादत्वात् । तस्मादहोरात्राविति इतरेतरद्वन्द्व एवेहोदाहर्तुम् उचित इत्यत आह- अनन्तरत्वात्परवल्लिङ्गतापवादोपि परत्वात्समाहारनपुंसकतां बाधते । अहोरात्रः - अहश्च रात्रिश्च तयोः समाहारद्वन्द्वः । रात्रेः पूर्वभागः - पूर्वरात्रः । अह्नः पूर्वम् - पूर्वाह्णः ।

**815-अपथं नपुंसकम् – 2/4/30//** न पन्थाः इति विग्रहे नञ्समासो नञो नस्य लोपे "ऋक्पूः" इत्यप्रत्यते टिलोपे अपथशब्दः स नपुंसकमित्यर्थः। परवल्लिङ्गताऽपवादः। तत्पुरुष इत्येव । परवल्लिङ्गम् इत्यतस्तदनुवृत्ते- रिति भावः । द्वन्द्वग्रहणं तु नानुवर्तते , अयोग्यत्वात् । अन्यत्र तु अपथो देशः । बहुव्रीहौ इत्यर्थः । कृतसमासान्तनिर्देशात् । अपन्थाः । पथो विभाषा इति समासान्तविकल्पः ।

**816-अर्धर्चाः पुंसि च – 2/4/31//** बहुवचनात्तद्रादीनां ग्रहणमित्याह- अर्धर्चादयः शब्दाः पुंसि क्लीवे च स्युः । अर्धर्चः – अर्धर्चम् । ऋचोर्धम् इति विग्रहे अर्धं नपुंसकम् इति समासः । परवल्लिङ्गं स्त्रीत्वं बाधित्वा पुन्नपुंसकत्वविकल्पः । ध्वजः – ध्वजम् । एवं तीर्थशरीरमण्डपीयूषदेहाङ्कुशकलशेत्यादि ।

**817-जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् – 1/2/58//** आकृत्यधिकरणन्यायेन घटादिशब्दानां जातिवाचकत्वात् जातेश्चैकत्वादेकवचनमेव स्यादित्यारम्भः । जातिशब्दे एकत्वे बहुवचनं वा स्यादित्यक्षरार्थः तथा सति ब्राह्मणाः पूज्याः इत्यादौ विशेषणान्न स्यादित्याशङ्क्य एकस्मिन्नर्थे विद्यामानः शब्दः बहूनर्थान् वक्ति , एकार्थो बहुवद्भवतीति लभ्यते इत्यभिप्रेत्याह – एकोप्यर्थो वा बहुवद्भवति । बहुत्वप्रयुक्तं कार्यं लभते इत्यर्थः । ब्राह्मणाः पूज्याः – ब्राह्मणः पूज्यः ।

**818-अस्मदो द्वयोश्च** – 1/2/49// एकत्वे विवक्षिते अस्मदो बहुवचनं वा स्यात् । वयं ब्रूमः । पक्षे अहं ब्रवीमि, आवां ब्रूव इति वा ।

**820-तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्** – 1/2/63// बहुत्वं द्वित्ववद्भवति । तिष्यश्च पुनर्वसू च – तिष्यपुनर्वसू ।

**821-स नपुंसकम्** – **2/5/17//** द्विगुरेकवचनम् इति द्विगुः । द्वन्द्वश्च प्राणि इति द्वन्द्वश्च तच्छब्देन परामृश्यते । तौ च समाहारार्थावेव विवक्षितौ , व्याख्यानात् । तदाह- समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । परवल्लिङ्गताऽपवादः । पञ्चगवम् – पञ्चानां गवां समाहारः इति द्विगुः । दन्तोष्ठम् – दन्ताश्च ओष्ठौ च इति समाहारद्वन्द्वः ।

**अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः – वा. 1546** अकारान्तम् उत्तरपदं यस्येति विग्रहः। "स नपुंसकम्" इत्यस्यापवादः । पञ्चमूली- पञ्चानां मूलानां समाहारः इति समाहारद्विगुः , स्त्रीत्वं "द्विगोः" इति ङीप् ।

**822.तत्पुरुषोऽनञ्कर्मधारयः – 2/4/19//** तत्पुरुषः , अनञ् – कर्मधारयः इति पदत्रयम्। नपुंसकम् इति अनुवृत्तम् अधिकारसूत्रम् । नञ्समासकर्मधारयाभ्यां भिन्नस्तत्पुरुषो वक्ष्यमाणकार्यभागित्यर्थः । तदाह- अधिकारोऽयम् । परवल्लिङ्गम् इत्यतः प्रागिति शेषः ।

**823-संज्ञायां कन्थोशीनरेषु- 2/4/20//** कन्थान्तस्तत्पुरुषः क्लीवं स्यात् , सा चेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा । सुशमस्यापत्यमिति सौशमयः । तेषां कन्था सौशमिकन्थम् । संज्ञायाम् किम्? वीरणकन्था ।

**824-उपज्ञोपक्रमं तदाद्याचिख्यासायाम् – 2/4/11//** उपज्ञायते प्रथमं ज्ञायते इति उपज्ञा। उपक्रमते आरभ्यते –इत्युपक्रमः ।उपज्ञाचोपक्रमश्चेति समाहारद्वन्द्वः ।

स नपुंसकम् इत्यतो तत्पुरुषः इत्यस्य विशेषणमिदम् , तदन्तविधिः , नपुंसकमित्यनुवर्तते तदाह- उपज्ञान्तः उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात्। तत्शब्देन उपज्ञोपक्रमौ विवक्षितौ । आदिशब्दो भावप्रधानः प्राथम्ये वर्तते । तयोरादिः प्राथम्यं तदादिः। तस्य आचिख्यासा आख्यातुमिच्छा,विवक्षामिति यावत् । तदाह- तयोरुपज्ञायमानोपक्रम्यमानयोरादिः प्राथम्यं चोदाख्यातुमिष्यते । पाणिनेरुपज्ञा – पाणिन्युपज्ञं ग्रन्थः । पाणिनिना प्रथमं ज्ञायमान इत्यर्थः । इदं प्रकरणं परवल्लिङ्गत्वस्य विशेष्यनिघ्नत्वस्य चापवादः ।

**825-छाया बाहुल्ये 2/4/22//** छायया तत्पुरुषस्य विशेषणत् तदन्तविधिमभिप्रेत्याह- छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये । इक्षूणां छाया – इक्षुच्छायम् ।

**826.सभाराजाऽमनुष्यपूर्वा – 2/4/23//** राजा च अमनुष्यश्च राजाऽमनुष्यौ, तौ पूर्वौ यस्याः सा राजामनुष्यपूर्वा इति विग्रहः । छायया तत्पुरुषविशेषणात्तदन्तविधिः । राजपर्याय एव विवक्षितः न तु राजन्शब्दः ।

तदाह- राजपर्यायपूर्वोमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् । ईश्वरसभम् - ईश्वरस्य सभा इति विग्रहः । नेह राजसभा , चन्द्रगुप्तसभा । राजन्शब्दपूर्वकत्वेपि अत्र राजपर्यायपूर्वकत्वं नास्तीति भावः । चन्द्रगुप्त इति राजविशेषस्य नाम न तु तत्पर्याय इति भावः । नन्वमनुष्यपूर्वत्वात् देवसभेत्यादावपि स्यादित्यत आह- अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह । रक्षस्सभम् , पिशाचसभम् ।

**827- अशाला च – 2/4/24//** अशालार्थः सभाशब्दः शालायां सङ्घातार्थे च वर्तते । तत्र राजामनुष्यपूर्वकस्य शालावाचिनः सभाशब्दस्य पूर्वसूत्र क्लीवत्वमुक्तम्। सम्प्रति संघातवाचिनः सभाशब्दस्य क्लीवत्वमुच्यते इत्याह- सङ्घातार्था या सभा तदन्तस्तत्पुरुषः क्लीवं स्यात् । स्त्रीसभम् । स्त्रीसङ्घात इत्यर्थः । अशालायां किम्? धर्मसभा । धर्मशाला इत्यर्थः ।

**828- विभाषा सेनासुराच्छायाशालानिशानाम् – 2/4/25//** प्रथमार्थे षष्ठी । तत्पुरुष इत्यनुवृत्तं सेनादिभिर्विशेष्यते। तदन्तविधिः । तदाह- एतदन्तस्तत्पुरुषः क्लीवं वा स्यात् । प्रत्येकाभिप्रायमेकवचनम् । ब्राह्मणसेनम् – ब्राह्मणसेना । यवसुरम् – यवसुरा । कुड्यच्छायम् – कुड्यच्छाया । गोशालम् – गोशाला । श्वनिशम् – श्वनिशा शुनो निशा इति विग्रहः । कृष्णचतुर्दशीत्याहुः । शुनश्चतुर्दश्यामुपवसतः पश्यामः इति तिर्यगधिकरणे शाबरभाष्ये स्थितम् । दृढसेनो राजा । दृढा सेना यस्येति बहुव्रीहिः । तत्पुरुषत्वाभावात् न क्लीवत्वविकल्पः । असेना तत्पुरुषत्वेपि नञ्समासत्वान्न क्लीवत्वविकल्पः । परमसेना कर्मधारयत्वात् न क्लीवत्वम् । "तत्पुरुषोनञ्कर्मधारयः" इत्यधिकारस्य अत्रैव प्रयोजनमिति कैयटे प्रपञ्चितम् ।

## इति तत्पुरुषसमासप्रकरणम् ।

# आदर्शप्रश्ना:

## Unit - I

१. सिद्धान्तकौमुद्यां 'हलन्त्यम्' इति सूत्रस्य द्विरावृत्तिः कथं भवति ?
२. कनि माहेश्वराणि सूत्राणि ?
३. उदात्तानुदात्तस्वरितानां संज्ञां निरूपयत ।
४. वर्णानामुच्चारणस्थानानि वर्णयत ।
५. प्रयत्नभेदं स्पष्टीकुरुत ।
६. नाऽऽज्झलौ – इति सूत्रं व्याख्यात।
७. सवर्ण ग्राहक सूत्र मुपन्यस्य नाऽऽज्झलौ इति सूत्रे आकार प्रश्लेषस्य कोऽभिप्राय: इति स्पष्टी कुरुत।
८. निषेधविकल्पयो: संज्ञां वर्णयत।
९. परिभाषाया: लक्षणं विवृणुत।
१०. इकोगुणवृद्धी – इति सूत्रं व्याख्यात।
११. स्थानेऽन्तरतम: इति सूत्रं सोदाहरणं व्यख्यात।
१२. अकृतव्यूहा: पाणिनीया: इति कथमुच्यते।

## Unit – II

सोदाहरणं व्याख्यात – (टिप्पणी प्रदेया)

१. इको यणचि ।
२. अनचि च।
३. अचोरहाभ्यां द्वे।
४. सर्वत्र शाकल्यस्य
५. एचोऽयवायाव:
६. वान्तो यि प्रत्यये
७. लोप: शाकल्यस्य
८. आद् गुण:
९. वृद्धि रेचि
१०. तस्य परमाम्रेडितम्
११. अवङ्स्फोटायनस्य
१२. एङ: पदान्तादति

## Unit - III

सोदाहरणं सूत्रं व्याख्यात ।

१. प्रातिपदिकार्थलिङ्ग परिमाण वचनमात्रे प्रथमा
२. कर्तुरीप्सिततमं कर्म
३. अकथितं च
४. अधिशीङ्स्थाऽऽसां कर्म
५. कर्त्तृकरणयोस्तृतीया
६. येनाङ्गविकार:
७. धारेरुत्तमर्ण:
८. स्पृहेरीप्सित:
९. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु
१०. तुमर्थाच्च भाववचनात्

टिप्पणी प्रदेया :

१. ध्रुवमपायेऽपादानम्

२. भीत्रार्थानां भयहेतुः

३. पराजेरसोढः

४. जनिकर्त्तुः प्रकृतिः

५. प्रतिनिधिप्रतिदाने च यस्मात्

६. षष्ठीशेषे

७. षष्ठी हेतु प्रयोगे

८. अधीगर्थदयेशां कर्मणि

९. कर्त्तृकर्मणोः कृति

१०. क्तस्य च वर्त्तमाने

११. यस्य च भावेन भावलक्षणम्

१२. यतश्चनिर्धारणम्

टिप्पणीप्रदेया

१. समर्थः पदविधिः

२. सह सुपा

३. उपसर्जनं पूर्वम्

४. यावदवधारणे

५. सुप्प्रतिना मात्रार्थे

६. यस्य चायामः

७. भक्ष्येण मिश्री करणम्

८. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः

९. कर्तृकरणे कृता बहुलम्

१०. पञ्चमीभयेन

११. प्रत्येकं ससूत्रं विग्रहवाक्यं समास नाम च निरूपयत।

राजपुरुषः, कल्पनापोढः, सर्वमहान्, देवपूजकः, दन्तलेखकः, ईश्वराधीनः, मासजातः, पूर्वाह्णः, पुरुषव्याघ्रः, मृगीचपला, नीलोत्पलम्, कृष्णसर्पः, त्रयोदश, पूर्वरात्रः, अपन्थाः।